## फार्म - ४

**नियमः ८ द्रष्टव्यः**

| | | | |
|---|---|---|---|
| 1. | प्रकाशनस्थानम् | : | आरा (विहारः) |
| 2. | प्रकाशनस्य अवधिः | : | अर्धवार्षिकम् |
| 3. | मुद्रकस्य नाम | : | प्रो. गोपबन्धु मिश्रः |
| | किमसौ भारतस्य नागरिकः ? | : | एवम् |
| | सङ्केतः | : | संस्कृतप्रसारपरिषद्, आरा |
| 4. | प्रकाशकस्य नाम | : | प्रो. गोपबन्धु मिश्रः |
| | किमसौ भारतस्य नागरिकः ? | : | एवम् |
| | सङ्केतः | : | संस्कृतप्रसारपरिषद्, मारुतिमन्दिरम् प्रकाशपुरी, आरा (विहारः) |
| 5. | सम्पादकस्य नाम | : | प्रो. गोपबन्धु मिश्रः |
| | किमसौ भारतस्य नागरिकः ? | : | एवम् |
| | सङ्केतः | : | संस्कृतप्रसारपरिषद्, मारुतिमन्दिरम् प्रकाशपुरी, आरा (विहारः) |
| 6. | तेषां जनानां नामानि सङ्केताश्च ये समाचारपत्रस्य स्वामिनः स्युः तथा च ये समस्तव्ययस्य एकप्रतिशतात् अधिकस्य अंशग्राहकाः स्युः | : | संस्कृतप्रसारपरिषद्, मारुतिमन्दिरम् प्रकाशपुरी, आरा (विहारः) |

अहं गोपबन्धु मिश्रः एतद्द्वारा उद्घोषयामि यत् मम अधिकतमस्य बोधस्य विश्वासस्य च अनुसारेण उपरि प्रदत्तं विवरणं सत्यम् अस्ति।

**ह. गोपबन्धु मिश्रः**
सम्पादकः

# आरण्यकम्

अर्धवार्षिकं संस्कृतशोधपत्रम्

**संस्कृतप्रसारपरिषद्**
**आरा (विहारः)**

**ऊनविंशं वर्षम्, प्रथमोऽङ्कः**
**मार्च 2012**

## 'आरण्यक'स्य नियमाः

1. संस्कृतप्रसारपरिषद्, आरा-पक्षत इदं षाण्मासिकं शोधपत्रं संस्कृतेन चैत्र-आश्विनमासयोः (मार्च-सितम्बर) प्रकाश्यते। वर्षारम्भः चैत्रात् (मार्च तः) मन्यते।
2. ग्राहकत्वं पूर्णवर्षस्यैव स्वीक्रियते। मध्येवर्षं ग्राहकत्वं काङ्क्षतः पूर्णवर्षस्य शुल्कमपेक्ष्यते। तादृशाय ग्राहकाय वर्षस्य पूर्वप्रकाशितोऽङ्क उपलब्धौ सत्यां प्रेषयिष्यते।
3. वार्षिकं शुल्कं पञ्चाशत् (50) रूप्यकाणि, तथा च एकस्याङ्कस्य पञ्चविंशतिः रूप्यकाणि वर्त्तते। शुल्कं धनादेश/ड्राफ्टमुखेन प्रेषणीयम्।
(क) धनादेश (M.O) द्वारा शुल्कप्रेषणं श्री **नीलमणि पाठकः, गणपति ज्वेलर्स के पीछे, महावीरस्थान, मौलाबाग, आरा( विहार )-802301** दूरभाषः-09431451895 नाम्ना करणीयम्।
(ख) बैंक ड्राफ्ट **'संस्कृतप्रसारपरिषद्'** इति नाम्ना 'आरा' ( विहारः ) नगरे व्यवहरणीयं कृत्वा **श्रीनीलमणि पाठकस्य** उपरिलिखिते (3.क इत्यत्र) सङ्केते प्रेषणीयम्।
4. विमर्शात्मका अनुसन्धानात्मकाश्च शास्त्रीया अप्रकाशितपूर्वा उच्चस्तरीया गम्भीराश्च मौलिका निबन्धाः प्रकाशनाय गृह्यन्ते। अस्वीकृता लेखा निर्धारित-'स्टाम्प'-प्राप्त्यनन्तरं प्रत्यावर्तयितुं शक्याः।
5. काव्य-नाटक-चरित्रवर्णन-व्यङ्ग्य-हास्यसम्बद्धा नव्या रचना अत्र स्थानं न लभन्ते।
6. प्रकाशनाय प्रेषिताः सर्वविधा रचनाः शुद्धा एकस्मिन् पत्रपृष्ठे सुस्पष्टाक्षरैः लिखिताः टङ्किता वा स्युः। रचनाऽन्ते रचयितुः आवाससङ्केतः पदनिर्देशश्च उल्लिखितौ स्याताम्।
7. प्रकाशितसंस्कृतकाव्यनाटकाऽऽलोचनादिग्रन्थानां समीक्षार्थं सम्बद्धग्रन्थस्य प्रतिकृतिद्वयं सम्पादकं प्रति प्रेषणीयम्।
8. लेखकेभ्यः तत्प्रकाशितलेखानां पञ्च प्रतिरूपाण्यपि दीयन्ते।
9. लेखानां प्रकाशनस्य सम्पादनस्य च सर्वाधिकारः सम्पादकाधीनः।
10. 'आरण्यक'सम्बद्धः लेखप्रकाशनसमीक्षादिविषयकः सर्वविधपत्रव्यवहारः **डॉ. गोपबन्धु मिश्रः, प्रोफेसर, संस्कृतविभागः, काशी हिन्दू विश्व-विद्यालयः, वाराणसी-221005 इति सङ्केतेन** दूरभाषः-0542-2310561, (चलः) 09450870788 विधेयः।

# आरण्यकम्

संस्कृतप्रसारपरिषदः अर्धवार्षिकं शोधपत्रम्

वर्षाङ्कौ - ऊनविंशं वर्षम्, प्रथमोऽङ्कः

**चैत्रः, वि.सं.२०६९**

**मार्च, २०१२**

**प्रतिवर्षं प्रकाशनकालः**
**चैत्रः, आश्विनः-विक्रमाब्दः**
**मार्च, सितम्बर**

प्रत्यङ्कम् - २५ रूप्यकाणि
संयुक्ताङ्कः - ५० रूप्यकाणि

वार्षिकं शुल्कं ५० रूप्यकाणि

## परामर्शदात्री समितिः

डॉ. सुरेशचन्द्र गो. काण्टावाला, बड़ोदरा
डॉ. हरिहर झा, दरभङ्गा
डॉ. उमाशङ्कर शर्मा 'ऋषिः', पटना
डॉ. भागीरथ त्रिपाठी 'वागीशः शास्त्री', वाराणसी
डॉ. राय अश्विनी कुमारः, बोधगया

⊛

संस्थापकः
**स्व. पण्डित व्रजभूषण मिश्र 'आक्रान्तः'**

⊛

सम्पादकः
**प्रो. गोपबन्धु मिश्रः**
संस्कृतविभागः
काशी हिन्दू विश्वविद्यालयः, वाराणसी
भूतपूर्वः अतिथ्यध्यापकः (संस्कृतम्)
सोर्बोन नोवेल विश्वविद्यालयः, पारिस (फ्रान्स)

⊛

सह-सम्पादकः
**डॉ. सुनीलकुमार प्रधानः**

⊛

प्रकाशिका
**संस्कृतप्रसारपरिषद्**
महावीरस्थानम्
मौलाबाग, आरा (विहारः) 802301

⊛

संस्कृतप्रसारपरिषद्, आरा पक्षतः प्रो. गोपबन्धु मिश्रेण, महावीर प्रेस, बी.20/44, भेलूपुर, वाराणसी इत्याख्ये मुद्रणालये मुद्रितं प्रकाशितं च।

**प्रो. गोपबन्धु मिश्रः**
सम्पादकः

## सम्पादकीयम्

ज्ञानम् इच्छायाः, इच्छा क्रियायाश्च कारणं भवति। प्रयाणं प्रणयाय, प्रणयोऽनुरागाय, अनुराग आसक्तेः, आसक्तिः पीडायाश्च हेतुत्वं निर्वर्तयति। 'ध्यायतो विषयान् पुंसः... ... बुद्धिनाशात् प्रणश्यति' इति गीतायां श्रीभगवदुक्तिः विषयध्यानादारभ्य प्रणाशं यावत् जन्यजनकभावशृङ्खलां विवृणोति। तत्रापि विषयध्यानजन्ये विषयसङ्गे, विषयसङ्गजन्ये कामे, कामजन्ये क्रोधे, क्रोधजे सम्मोहे, सम्मोहप्रभवे स्मृतिविभ्रमे, स्मृतिभ्रमप्रभवे बुद्धिनाशे बुद्धिनाशप्रभवे प्रणाश इति क्रमव्यवस्थायां विषयसङ्गकामादिगतविरामस्थलेष्वपि क्रमोऽयं कामपि अनुभूतिं सूचयत्येव। अर्थात् प्रणाशाख्याया अन्तिमपरिणतेः उत्पत्तेः प्रागपि विषयसङ्ग-काम-क्रोधादिष्ववस्थासु काप्यनुभूतिः किं च तत्तद्वैशिष्ट्यमधिरूढा विविधानुभूतिस्तु भवत्येव। कीदृश्यः कियत्स्वभावा वा ता अनुभूतयः? अवश्यमेव अतीव आह्लादकारिण्यः श्लाघ्याः उपादेयास्ता नैव स्युः। अग्रे गीतायामेव--

**काम एष क्रोध एष रजोगुणसमुद्भवः।**
**महाशनो महापाप्मा विद्ध्येनमिह वैरिणम्।।** (गीता ३/३७)

इत्युक्त्वा कामक्रोधयोः शत्रुवत् प्रवृत्तिरभिहितैव। अतः उपर्युक्तक्रमव्यवस्थायां प्रतिविरति विषयसङ्गादि कामपि असंलक्ष्यां पीडामेव जनयतीति वक्तुं शक्यते।

एते विषयसङ्गादयः मानसिकीं कामपि विकृतिं विशिष्टां वाऽवस्थां जनयित्वा असहजां स्थितिं समुत्पादयन्ति एव। तादृशी असहजता कदाचित् अननुभूयमानाऽपि अन्ततोगत्वा पीडामेव निर्वर्तयति। अतः संसारे आसक्तो वा उदासीनो वा, अलसो निरलसो वा अनवधानः सावधानो वा सर्वः कोऽपि पीड्यमानतामनुभवत्येव। वस्तुजातैः सह जननिचयैः सह सर्वस्य न्यूनाधिक्येन पीड्य-पीडकभावः सम्बन्धो भवति। यः सूर्यः जीवनाधारो भवति, स एव समधिकोत्तापदाहं जनयति, अग्निः अन्नादिपाके करणमपि सर्वभुक्तया गृहदाहादिमुखेन महतीं पीडामुत्पादयति, एवमेव जलं वायुश्चेत्यादयः आधारभूताः तत्तदवसरेषु भृशं पीडका अपि भवन्ति।

**नारायणोऽपि सहते जनिजन्यपीडां**
**सा देवकी च सहते प्रतिगर्भपीडाम्।**
**पीडां प्रसह्य जगति क्षमतां समेति**
**प्रत्येकमेव परिनिष्ठितजीवलोकः।।**

रुग्णालये स्थानम् अप्राप्य प्रसूतिवेदनया कातरा काचित् मार्गे एव शिशुद्वयं प्रसूय दिवं प्रयातेति कोलकातावार्ताप्रसारणे तस्मिन् दिवसे श्रुतम्। शरीरनिवृत्तेः आत्यन्तिक-पीडानिवृत्तिरिति सहजबोध्यः प्रसङ्गः। किन्तु मुक्तपीडायास्तस्याः इयं प्रसूतिपीडा तस्य शिशुद्वयस्य आजीवनं पीडायै खलु! पुनश्च मरणात् प्राक् या या पीडा तयाऽनुभूता, रुग्णालये तिरस्कारकारणेन मानसिकी पीडा, दारुणप्रसूतिपीडा, असहायदशाया कल्पितानेकविधा पीडा चेति सा पीडा तन्मरणोत्तरं शिशुद्वयस्य सहजातपीडाम् अजनयदेव। पीडा पीडां समजनयत्। पीडायै पीडा। मानवः यावज्जीवं विविधां पीडां पीडानिवृत्तये सहते खलु? किं तादृशी निवृत्तिर्लभ्यते? एका पीडा निवृत्तिमेति न वा, पीडान्तरं प्रारभते--

एकस्य दुःखस्य न यावदन्तम्... रुग्णालयं यावत् प्राप्तिरासीत् पीडायै, सा पीडा रुग्णालये स्थानप्राप्त्याशया कथमपि सोढा। यावत् सा सह्यमानत्वं प्राप्नोति स्म, तावत् तत्र स्थानाभावसूचनां तिरस्कारो वा नवीनां पीडाम् अजनयत्। कथमपि कुत्रापि नवान्तुकस्य आविर्भावेन एषा पीडा अपगमिष्यतीति चिन्तया यावत् तस्याः सहनम् आरभ्यत, तावत् प्रसूतिपीडा प्रारब्धा, त्वरितमेव शिशुमुखदर्शनेन कथमपि एषा पीडा अपगमिष्यतीति आशया तां पीडामितरा काचित्सद्यःप्रसूता मातेव सोढुम् अयतत, तावत् रक्तहीनता क्लान्तिः आन्तरिकाङ्गविकृतिरित्यादिजन्या पीडा समुदभवत्। यावत् क्रमशः शिशुद्वयस्य जनिरजायत, तावत् प्राणरक्षणक्लेशः समारभत। शरीरात् प्राणा निर्गताः पीडाऽप्यपगता। किं सर्वविधपीडाया इयमेकैव मुक्तिसङ्गतिः? को वा वदेदत्र यत् स सर्वथा मुक्तपीडो जीवतीति? यावज्जीवनम्, तावत् पीडायाः असमाप्या कथा, गाथा, प्रसृतिः व्याप्तिः च। शास्त्रेषु आध्यात्मिक-आधिदैविकाधिभौतिकेतित्रिविधतापरूपेण वर्णिता एषा। 'पीड्यन्ते गृहिणः कथं नु तनयाविश्लेषदुःखैर्नवै' रिति अभिज्ञानशाकुन्तलस्य चतुर्थेऽङ्के कुलपतिः कण्वोऽभिधत्ते। गृहिणां न केवलं तनयाविश्लेषदुःखजनिता पीडा, अपि तु आर्थिकी, सामाजिकी, शारीरिकीत्यादि पीडा इति जात्याख्यायाम् एकवचनं प्रयोक्तुं शक्यम्। अर्थात्, पीडा एका जातिः अनेकविधपीडाव्यक्तिषु विद्यमाना सततं जागरिता, सातत्येन मानवैः सह संलग्ना अत एव आधुनिकयुगे नारी-उत्पीडन दलितोत्पीडन--आदयः नवीनाः शब्दाः शब्दकोषे स्थायित्वम् अभजन्। कामपीडया पीड्यमानाः काव्यनायकनायिकादयो बहुधा वर्णिताः सन्त्येव। क्षुधाप्रपीडिता जनाः भोज्यमन्विष्यन्तः क्रोशान् धावन्तो दृश्यन्ते। विविधव्याधिपीडापीडिता जनाः रुग्णालयेषु स्वस्वपीडानिवृत्त्यर्थं पङ्क्तौ तिष्ठन्तः दीर्घकालव्यत्ययजन्याम् अतिरिक्तां पीडामनुभवन्तः परिलक्ष्यन्ते, प्रेक्षालयेषु चलच्चित्राणि दृष्ट्वा तत्तदभिनयप्रभावभाविताः सहृदयाः तत्तन्नाट्यादिगतचरित्राणां विविधदैन्य-बुभुक्षोपेक्षादिपीडाभिः भृशं पीडिताः अश्रूणि मुञ्चन्तो भवन्ति। तत्र ते स्वयम् अपीड्यमाना अपि नाट्यगतकृतकपीडया तथा पीड्यन्ते यथा



ते स्वकीयजीवने वास्तविकदुःखैरपि तथा विचलिता नैव भवन्तीति महदाश्चर्यकरीयम् अपीडा पीडा।

अखिलमिदं पीडाव्यवसायप्रकरणं समीक्ष्यते चेदिदं वक्तुं शक्यते चेत् अनङ्गाऽपीयं पीडा आ जन्मनः विविधैः रूपैः अस्माभिः सहवसतिमाचरन्ती भवति। कदाचित् ताटस्थ्यमादाय एतस्याः विविधं विपुलं च स्वरूपम् अनुध्यातुं शक्नुमो वयम्, किन्तु तेनानुध्यानेन किम्? ततो निवृत्तिः? अशक्या एव। बहुरूपा एषा। एकस्याः अवसानम्, अपरस्या आविर्भावः अथवा प्रथमायाः रूपान्तरमेवेति अनन्तेयम् अस्या लीला। ज्ञानिनोऽपि पीड्यन्ते, यथाऽऽह कण्वः--'वैक्लव्यं मम तावदीदृशमपि' इत्यादि। श्रीरामकृष्णपरमहंसोऽपि कण्ठे अर्बुदरोगग्रस्तः शारीरिकपीडामन्वभवत्।

किन्तु एक एव पन्थाः, ताटस्थ्येन पीडा (शारीरिकी मानसिकी इत्यादिषु काचिदपि) अभिज्ञायते चेत् तां सोढुं शक्तिसञ्चयं कर्तुं शक्यते। काचिदपि पीडा सम्बोधयितुं शक्यते--

पीडे! पीडयसि माम्? आनन्दम् अनुभवसि खलु! त्वया पीडितस्य मे दशाम् उपहससि किल? अहमपि त्वयि दये। मादृशान् जीवान् विहाय क्व ते गतिः? कुत्र तवाश्रयः? अस्माकं तनुरस्ति, त्वमसि, अस्माकं मनः, हृदयं, स्वजनः, परिजनः, ग्रामो देशः इत्येतत् सर्वमस्ति इत्यतः तत्तत्स्थलगता त्वं मां विविधैर्व्याजैः पीडयितुं प्रभवसि। अतः मदाश्रया त्वम्, न त्वदाश्रयोऽहम्। यथाऽऽह श्रीभगवान् गीतायाम्- 'नत्वहं तेषु, ते मयि।' अस्मदाधारं विना का ते गतिः? अतः तव क्रीडनं लीलां वा दृष्ट्वा तेऽकिञ्चनतां समीक्ष्य त्वयि अनुकम्पे। मां पीडयसि त्वमिति त्वदीयं चिन्तनमलीकम्, त्वदाधारत्वेन त्वयि मे सततमनुकम्पेत्येतदेव सत्यम्।

**मृषा त्वं भाषसे पीडे**
**पीडयस्यखिलानिति।**
**वर्तसे त्वं हि मद्धेतो-**
**स्तव लीला मदाश्रया।।**

पीडोत्पीडयति चेत् प्रतिक्रिया भवत्येव। प्ररुदितं श्रीरामं वीक्ष्य तमसा वदति- **पूरोत्पीडे तटाकस्य परीवाहः प्रतिक्रिया।** (उत्तररामचरितम् ३/२९)

अर्थात् पीडारूपेण पीडा सर्वथा नैव तिष्ठति, सा उत्पीडायां परिणमति। पीडा कदाचित् सोढव्या भवति, किन्तु उत्पीडा उत्पीडनं वा प्रतिक्रियां जनयति। कदाचित्तु उत्पीडा तथा विवृद्धा भवति येन क्रियाया अपेक्षया प्रतिक्रिया तीव्रतरा व्याप्ततरा च भूत्वा मूलक्षयकारिणी अपि भवति। समाजे आत्मदाहः आत्मघातः, इतरसंघात इत्यादयो ये व्यापाराः दृश्यन्ते तत्र तत्तत्प्रतिक्रियाजन्यत्वं सुतरां विमर्ष्टुं शक्यते। अथ च भौतिको बौद्ध आध्यात्मिको वा विकासः कस्यचित् क्रियया एव शक्यो न तु

प्रतिक्रियया। सूर्याग्निजलादीनाम् उपयोगेनैव जीवामः न तु तेषां शक्तेः प्रतिकूलप्रभावेण। पित्रोः स्नेहेन अपत्यानि विवर्धन्ते, न तु तयोः कोपेन असन्तोषजन्यकार्यनिचयेन। उपाध्यायेभ्यः नियमपूर्वकं विद्याध्ययनेन छात्राणां ज्ञानं समेधते, न तु तेषाम् उपेक्षाभावेन। 'स्वे स्वे कर्मण्यभिरतः संसिद्धिं लभते नरः' इत्यत्र भावात्मककर्मभिः संसिद्धिः तथा च 'न कर्मणामनारम्भात् नैष्कर्म्यं पुरुषोऽश्नुते' इत्यत्र अभावात्मककर्मणा विपर्यय इति उभयविधप्रसङ्गे कृत्याकृत्यप्रवृत्तिनिवृत्ती दर्शयित्वा श्रीभगवता गीतायां जीवने क्रियायाः कर्मणो वा महत्त्वं प्रत्यपादि, किं च प्रतिक्रियायाः वैकल्यं वैफल्यं च प्रादर्शि।

संस्कृतवाङ्मये निहितं 'जीवनदर्शनं मनुष्यान् क्रियासु प्रवर्तयति।

'कर्मण्येवाधिकारस्ते' इत्यत्र क्रियाया अनिवार्यता, किं च 'मा फलेषु कदाचन' इत्यत्र सम्भावितप्रतिकूलप्रतिक्रियायां, ताटस्थ्यं दर्शयता श्रीभगवता तादृशं दर्शनम् अभाणि। 'सत्यं वद, धर्मं चर' इत्यादिभिः औपनिषदैर्वचनैरपि तदेव सत्यं प्रतिपादितं लक्ष्यते।

अन्ताराष्ट्रियस्तरे संस्कृतमूलग्रन्थागारं शोध-संरक्षणाध्ययनादिप्रसङ्गे, किं च पाणिन्यादिशास्त्राणां प्रशंसाविषयकेषु कथनेषु तादृशी भावात्मिका क्रिया लालक्ष्यते। स्वामिनो विवेकानन्दस्य साहित्ये, अथ च भट्टिकाव्ये किं च वैदिकवाङ्मये विविध-व्यापाराणाम् औचित्यं सम्यग् आख्यातं विद्यते। आरण्यकस्य एषोऽङ्कः तत्तत्पक्षाणां विमर्शकानां विचारान् आत्मनि निधाय प्राकाश्यमायातीति क्रियाभ्यावृत्तिनिचयानां सदाशयतां पुरस्कृत्य तेन च सोढव्यमात्रायां पीडायां सत्यामपि उत्पीडाया मुक्तिम् आकलय्य आरण्यकमिदं प्रवर्तितुकामं विद्यत इति सप्रशयं विनिवेदयति

विदुषां वशंवदः

गोपबन्धु मिश्र

सम्पादकः

आरण्यकस्य

# सूचीपत्रम्


| विषयः | लेखकः | पृष्ठम् |
|---|---|---|
| १. संस्कृतविषयेऽन्ताराष्ट्रिय-विमर्शमूलग्रन्थाः | Prof. Pierre-Sylvain Filliozat<br>Professer of Sanskrit emeritus,<br>Member of 'Institut de France'<br>13, Rue Rambuteau<br>Paris | १ |
| २. सौश्रवस-पाणिनि-शास्त्ररीतिद्वयपरीक्षा | Prof. Dr. Jan E. M. Houben<br>Directeur Etudes "Sources et Histoire de la Tradition Sanskrite"<br>Ecole Pratique des Hautes Etudes,<br>SHP, A la Sorbonne, 45-47,<br>rue des Ecoles, 75005<br>Paris-France. | ७ |
| ३. स्वामिनो विवेकानन्दस्य स्तोत्रसाहित्यम् | डॉ. नारायणदाशः<br>संस्कृतविभागः,<br>रामकृष्णमिशनावासीयस्वयंशासित-<br>महाविद्यालयः, नरेन्द्रपुरम्, कोलकाता-१०३ | १५ |
| ४. विद्योतते कृषिविचारो वेदे | डॉ. ललित पटेलः<br>आसिस्टन्ट प्रोफेसर,<br>श्रीसोमनाथ संस्कृतविश्वविद्यालयसञ्चालित-<br>संस्कृतकालेज, वेरावलम् | २३ |

| विषयः | लेखकः | पृष्ठम् |
|---|---|---|
| ५. भारतीयदर्शनाभिमतं धर्मपर्यालोचनम् | डॉ. सुधाशुं कुमार षडङ्गी<br>सहाचार्यः<br>विश्वेश्वरानन्द विश्वबन्धु संस्कृत एवं भारत-भारती अनुशीलन संस्थान<br>पञ्जाब विश्वविद्यालय, होशियारपुर, पञ्जाब | २७ |
| ६. कविर्भट्टिस्तस्य काव्यञ्च | अरिजित गुप्तः<br>जे. आर. एफ.<br>संस्कृतविभागः<br>काशी हिन्दू विश्वविद्यालयः<br>वाराणसी | ३३ |




# संस्कृतविषयेऽन्ताराष्ट्रियविमर्शमूलग्रन्थाः

प्येर्-सिल्वें फिल्योजा

अपि काचिद्भाषा संस्कृताख्या अस्ति वा न वा? यद्यस्ति, किमर्थं सा ज्ञेया अध्येतव्या च? इतीमे प्रश्नाः यूरोपीयदेशेषु सप्तदशशतके केषांचिद्विद्वद्वराणां मनस्याविरासन्। तेषां केचित् जर्मनि-देशे फ्राँस् देशे च मनोविस्तृततया सम्यङ्निरीक्ष्य संस्कृतभाषाया अस्तित्वमधिगतवन्तः। अत एव कुतूहलप्रेरिताः तज्जिज्ञासवो बभूवुः। किन्तु कथं यूरोपीयदेशे तत्समये संस्कृतमध्येतुं शक्यते स्म। तस्मिन् काले एकैव गतिरासीत् - भारतदेशगमनमावश्यकमभूत्। तत्र चिरं न्युष्य संस्कृतपण्डितमुपगम्य केचित् संस्कृतमध्येतुमुत्साहेन बहुयत्नं कृतवन्तः। तदा भारतदेशगमनं साहसारम्भ आसीत्। केवलं साहसिकजना अन्ताराष्ट्रियव्यापारे बद्धादराः श्रेष्ठिनः, संपल्लोलुपा भटाः, खीस्तमतप्रचारकाश्च स्वजीवितं संशयेषु विधाय महासमुद्रान् तीर्त्वा जगत्पर्यटनं कृतवन्तः। द्वित्राः साहसाय प्रचोदिताः संस्कृतभाषायां बद्धादरा भारतदेशं प्राप्य संस्कृतभाषाया भारतीयसंस्कृतेश्च समीचीनं ज्ञानं लब्धवन्तः।

इदंप्रथमतया सप्तदशशतकेऽष्टादशशतके च गीर्वाणवाग्व्याकरणग्रन्थत्रयं लतिन (Latin) भाषामाश्रित्य यूरोपवासिनां विदुषां बोधाय यूरोपीयैर्विद्वद्भिर्विरचितम्। प्रथमतः कश्चिज्जर्मनीदेशीयो 1620तमे वत्सरे जातो हैन्रीष् रोथ् (Heinrich Roth) इति नामा खीस्तधर्मानुयायी येशुमठे (Society of Jesus) दीक्षितो 1650तमे वत्सरे तन्मठकुलपतिना स्वधर्मप्रचारार्थं भारतवर्षं प्रेषितः। 1652तमे वत्सरे स दक्षिणभारते गोआनगरं प्राप। ततः स उत्तरभारते, शाह-जहान्-नाम्नि राजाधिराजे मुघलसंराज्यं शासति, आग्राराजधानीं प्रेषित आसीत्। तत्र खीस्तीयधर्मपाठशालाया आध्यक्ष्यमधिकुर्वन् 1659तमे वत्सरे, औरंग्जेब्नाम्नि राजाधिपराजे शासति, स्वकार्यानुष्ठानान्ते ब्राह्मणानुपगम्य तेषां पाण्डित्यान्वितान् उपन्यासान् सावधानेन निशम्य संस्कृतभाषाम् अचिरादधिगतवान्। किंच अनुभूतिस्वरूपाचार्यप्रणीतं सारस्वतव्याकरणम् आलोड्य सम्यग् विचार्य च

नवीनं संस्कृतव्याकरणग्रन्थं रचितवान्। तस्मिन् ग्रन्थे सारस्वतव्याकरणमूलसूत्राण्यनूद्य लतिनभाषायां तद्व्याख्यानं कृत्वा पाश्चात्त्यरीत्या समस्तविषयान् विचिन्त्य नव्यसंविधानं प्रकल्प्य विषयाणामनुक्रमं परिवर्त्य षण्णवतिपृष्ठमयं ग्रन्थं प्रणीतवान् नागरी-लतिन-लिपिद्वयमधिकृत्य स्वहस्तेन लिखितवान् च। व्याकरणं न पर्याप्तम्, शब्दकोशोऽप्यपेक्ष्यते स्म। स एव याज्ञिकवेणीदत्तविरचितस्य पञ्चतत्त्वप्रकाशग्रन्थस्यापरहस्तेन लिखितं पुस्तकमादाय पृष्ठप्रान्तेषु पङ्क्त्युपरि च सर्वेषां पर्यायशब्दगणानामर्थान् लतिनभाषायां स्वहस्तेन लिखितवान्। तथैव श्रीमत्परमहंसपरिव्राजकाचार्यसदानन्दकृतवेदान्तसारग्रन्थस्य मातृकापुस्तकमादाय पृष्ठप्रान्तेषु तद्ग्रन्थरत्नस्य सम्पूर्णलतिनभाषाव्याख्यानं प्रणिनाय लतिनलिप्यां स्वहस्तेन तल्लिलेख च। तस्यानन्यस्य सप्तदशशतकीयस्य ख्रीस्तप्रचारकस्य भाषाद्वये पाण्डित्यमद्भुततमम् आसीत्। तत्कृतग्रन्थकोशस्य दैवघटनमप्याश्चर्यावहम्।

तस्मिन्नेव काले रोमपुर्या येशुमठकुलपतिः बैजिंग् (Beijing) नाम्नीं चीनदेशराजधानीं प्रति भूमिमार्गनिर्धारणार्थं समुद्रमार्गनिवारणार्थं चैतामाज्ञामदात्-द्वाभ्यां ख्रीस्तप्रचारकाभ्यां योहन्ग्रुबर्-अल्बेर्दोर्विल् नामभ्यां (Johann Grueber, Albert d'Orville) बैजिंग्पुर्याः सकाशात् रोमनगरं प्रति विविधदेशद्वारेण दीर्घयात्रा शीघ्रं कर्तव्या तन्मार्गणविषये निवेदनं दातव्यं चेति। उभौ तौ समुद्रमार्गेण चीनदेशं गत्वा भूमिमार्गेण प्रत्यागमनाय बैजिंग्सकाशात् प्रस्थितौ, पद्भ्याम् अटित्वा हिमालयपर्वतान् तीर्त्वा 1662तमे वत्सर आग्रानगरीं प्रापतुः। तदैव क्लिष्टतमप्रवासश्रान्तिवशात् दोर्विल् पञ्चत्वमगात्। ततश्च न केनाप्यद्वितीयेन ख्रीस्तप्रचारकेण चिरकालेन यात्रा कर्तव्येति नियमो येशुमठेऽभूत्। अत एव हैन्रिष्-रोथ्-विद्वान् ग्रुबेर्महाशयस्य सहायीभूय यात्रां निर्वाह्य स्वग्रन्थं धृत्वा 1664तमे वत्सरे रोमपुरीं प्राप्तवान्। उभौ चीनभूमिमार्गविषये विज्ञापनमकुरुताम्। किन्तु तयोर्निरूपणम् अपर्याप्तमिति कलयित्वा येशुमठकुलपतिः संतोषमप्राप्य तेनैव मार्गेण ताभ्यामेव चीनदेशं पुनर्गन्तुमाज्ञामदात्। रोथ्-महाविद्वान् पुनरपि ग्रुबेर्-सहायीभूय स्वकीययात्रापेटिकासु स्वग्रन्थरत्नं निधाय 1665तमे वत्सरे रोमसकाशात्प्रस्थितः तुरुष्कदेशप्रान्तं प्राप। तत्र तस्य सहायो ग्रुबेराख्योऽतीव रोगातुर आज्ञां निर्वोढुमशक्तो यात्रां त्यक्तवान्। रोथ् कंचित्सार्थवाहं संयुञ्जन् प्रस्थानसंभ्रमसमये प्रमादात् ग्रुबेर्-यात्रा-सामग्रीमादाय स्वकीयसामग्रीभ्रष्टो यात्राप्रवृत्तः भारतदेशं प्रति प्राचलत्। स सूरत्-पुरीं 1666तमे वत्सरे प्राप। चीनयात्रां समाप्तिं नेतुं नाशक्नोत्। आग्रानगरे 1668तमे वत्सरे दिवमगच्छत्। दैवाग्नियोगकारणेन आग्रापुरीस्थो येशुमठो भस्मावशेषोऽभवत्।



दिष्ट्या रोथ्-विदुषोऽनर्घग्रन्था न विनाशं गतवन्तः। शुभकरप्रमादात् ग्रुबेर्-महाशयस्य हस्तयोः पतिता अभवन्। स स्वास्थ्यं पुनर्लब्ध्वा रोमपुरीं प्रत्यागत्य तद्ग्रन्थान् रक्षितवान्। अन्ततस्तस्य ख्रीस्तीयधर्मप्रचारकस्य रोथ्-विदुषो हस्तलिखितकोशो रोमनगरे राष्ट्रियग्रन्थालये न्यस्तोऽभवत्। वर्षत्रिशते गते सप्तदशशतके लिखितः स कोशः 1988तमे वत्सरे प्रतिकृतिरूपेण प्रकाशमागतः सकलसंस्कृतरसिकविदुषां हस्तानिदानीं सम्प्राप्त इत्यहो विशिष्टेयं दैव्यनुकम्पा।

तदनन्तरं जर्मनिदेशे 1681तमे वत्सरे जातः एर्नेस्त् हॉक्स्लेदन् (Ernest Hanxleden) इत्याख्यो द्वितीयः ख्रीस्तीयधर्मानुयायी येशुमठे दीक्षितः ख्रीस्तमतप्रचारार्थं 1699तमे वत्सरे भारतवर्षं प्रेषितः। 1702तमे वत्सरे केरलराज्येऽधिकृतस्तत्राध्यवसत्। तत्र न केवलमचिरान्मलयालभाषाज्ञानं समुपासितवान्, किन्तु नम्बुदिरिब्राह्मणपण्डितानुपगम्य संस्कृतभाषामप्यधिगतवान्। स अर्णोसु-पादिरि (Arnos Padre) उपाख्याधरः केरलेषु सुविस्तृतकीर्तिः त्रिंशद्वर्षाणि लोकयात्रां विधाय 1732तमे वत्सरे दिवं गतः। मलयाळसंस्कृतसाहित्यसमुद्रयोः पारंगतः स विद्वन्मूर्धन्यो बहून् ग्रन्थान् विरराच। प्रथमतः स लतिन-भाषया पोर्तुगेस्-भाषया च मलयाळसंस्कृतव्याकरणग्रन्थान् शब्दकोशग्रन्थान् च प्रणीतवान्। किंच स कविप्रतिभान्वितः ख्रीस्तीयविषयेषु मलयाळभाषया महाकाव्यादिप्रबन्धान् विरचितवान्। संस्कृतव्याकरणशास्त्रे केरलेषु प्रसिद्धां रूपसिद्धिमधीत्य स लतिन-भाषामाध्यमेनाभिनवव्याकरणप्रबन्धस्य कर्ता तन्मातृकाकोशस्य लेखकश्च समजायत। एषा मातृका विस्मृता चिरकालं विनष्टत्वेन मता च सद्यःकाले प्रकाशं प्रत्यानीतेति महान् सुखावहोऽयं प्रसङ्गः।

अष्टादशशतकारम्भे भारतदेशस्य संस्कृतभाषायाश्च कृते कौतूहलोद्गमसमये समुपस्थिते फ्राँसीयराजमहापुस्तकाध्यक्षेण अबेबिञ्ञों (Abbe Bignon) नाम्ना तत्पुस्तकालयसंपत्तिसंवर्धनार्थं संस्कृतपुस्तकानामन्वेषणं सम्प्रापणं च विधातव्यमिति निर्णीतम्। विशेषतो वेदचतुष्टयस्यान्वेषणमिष्यते स्म। वेदानां नाममात्रं फ्राँस्-देशं प्राप्तमभवत्, वेदपाठः कदापि न श्रुतः, वेदानां पुस्तकानि न दृष्टान्यासन्। अतः 1719तमे वत्सरे पारिस्-पुरीवासी अबे-बिञ्ञों-महाशयः समस्तजगति प्रेषितेभ्यः ख्रीस्तप्रचारकेभ्यस्तत्तद्देशोपलब्धानां पुस्तकानां शिक्षणोपयोगिनां तत्तद्भाषाव्याकरणकोशानां च संग्रहणं संप्रेषणं चाज्ञापयत्। तेष्वेकः ख्रीस्तधर्मप्रचारकः फ्राँस्-देशे जातः तत्काले वङ्गदेशे चन्द्रनगरे निवसन् जाँ-फ्राँस्व-पोंस् (Jean-Francois Pons) नामा तामाज्ञां

मूर्ध्ना गृहीत्वा ब्राह्मणान् उपागमत् पुराणसंस्कृतमातृकाः क्रेतुं नवीनकोशप्रतिकृतीः कारयितुं वोद्युक्तश्चाभूत्। एवं पुराणेतिहासकाव्यनाटकदर्शनादिग्रन्थानां विशेषतो नव्यन्यायप्रबन्धानां द्विशतसंस्कृतपुस्तकानां तालपत्रमयानां वङ्गलिप्या हस्तलिखितानां पाण्डुलिपीनां संग्रहणं चकार। सर्वमेतत् 1736तमे वत्सरे फ्राँस्-देशं प्रति प्रेषितं पारिस्-नगरे राजमहापुस्तकालये विन्यस्तमासीत्। 1739तमे वत्सरे तत्र रक्षितानां भारतीयहस्तलिखितकोशानां सूची मुद्रिता प्रकाशिता च। किंच स संस्कृते व्युत्पन्नः पोंस्-महाशयः बोपदेवप्रणीतमुग्धबोधं क्रमदीश्वरविरचितं संक्षिप्तसारव्याकरणं चाधीत्य विचार्य यथामति यथार्थं संस्कृतव्याकरणं लतिन-माध्यमेन प्रणिनाय वङ्गलिपिं च स्वहस्तेन प्रलिलेख। प्रथमतः स मुग्धबोधरीतिमनुसृत्य संधिसुबन्ततिङन्तप्रकरणानि निरूपितवान्। ततः क्रमदीश्वरपद्धत्यनुसारेण कारकसमासादिप्रकरणानां निरूपणं फ्राँसीयभाषामाध्यमेन कृतवान्। तस्य व्याकरणग्रन्थस्य प्रथमभागो वङ्गदेशात् फ्राँस-देशं प्रेषितो बभूव। तस्मिन्नेव पुस्तके लतिनभाषाव्याख्यानसहितोऽमरकोशो धातुपाठः चाणक्यसारसंग्रहश्च वङ्गलतिनलिपिभ्यामुपलभ्यन्ते। तद्ग्रन्थरत्नं 1738तमे वत्सरे पारिस्-नगरे प्रतिगृहीतं राजपुस्तकालये न्यस्तं च। कदा द्वितीयभागः विरचित इति न ज्ञायते। जौमरव्याकरणानुसरणत्वात् तद्व्याकरणस्य वङ्गदेशे प्रसिद्धत्वाच्च तत्र चन्द्रनगरे सोऽपि विरचितः स्यात्।

परं तु कर्तृहस्तलिखितकोशो न तस्मिन्नेव काले फ्राँस-देशं प्रेषितः। स मूलकोशो विनाशं गतः स्यात्। 1739तमे वत्सरे पोंस्-महाशयः चन्द्रनगरं त्यक्त्वा दक्षिणभारतं जगाम। तत्र स्वधर्मप्रचारतत्परः द्राविडकर्णाटकराज्यपर्यटनं सततं कृत्वा युद्धव्याकुलितसमये बहुविघ्नाननुभूय स्वग्रन्थप्रेषणावसरमपि न लभते स्म। 1752तमे वत्सरे स दिवमगमत्। अत्रान्तरे पारिस्-नगरे राजपुस्तकालयप्राच्यविभागाध्यक्षः अँक्तिल्-दुपेरों (Anquetil Duperron) नाम्ना विद्वत्प्रवरः संस्कृतमध्येतुं संकल्प्य पोंस्-प्रणीतव्याकरणं पठित्वा कारकसमासादिप्रकरणानामभावमुपलभ्य पुदुच्चेरिनिवासिभ्यः ख्रीस्तधर्मप्रचारकेभ्यो व्याकरणशेषभागप्रेषणं प्रार्थयते स्म। 1772तमे वत्सरे प्रार्थितो द्वितीयभागो मूलमातृकाप्रतिकृतिरूपेण दुपेरों-विदुषा पारिस्-पुर्यां समधिगतः।

स राजमहापुस्तकालयः (अधुना फ्राँस् - राष्ट्रियपुस्तकालयाख्यः) सर्वेषां विदुषां कृते विवृतो बभूव। तद्दिवसात्प्रभृति पारिस्-नगरे संस्कृतशिक्षणोपयोगिनस्ते मुख्या उपायाः सकलयूरोपीयदेशानां जिज्ञासुभ्यो व्युत्पन्नजनेभ्यः समर्पिताः। एवं जाँ-फ्राँस्व-



पोंस् महाशयोऽन्ताराष्ट्रियसंस्कृतविमर्शप्रतिष्ठातृपदमर्हति। स न केवलं संस्कृतव्याकरणप्रचारमकरोत्। अपि च साहित्यदर्शनादिविषये सम्यग्व्युत्पन्नः स येशुमठाध्यक्षप्रेषितपत्ररूपेण संक्षिप्तसंस्कृतसाहित्यनिरूपणप्रकरणं व्यरचयत्। तत्र स संस्कृतभाषासौन्दर्यस्य व्याकरणकौशलस्य च विशिष्टतां विस्मयपूर्वमेतैः शब्दैर्वदति-

"ब्रह्मणानां व्याकरणं सुन्दरतमेषु विज्ञानेषु उत्कृष्टस्थानं भजते। तेषां संस्कृतभाषाया व्याकरणग्रन्थान् वर्जयित्वा न क्वापि विशेषविवेचनं सामान्यनिर्धारणं च साफल्यं लभेते। सा भाषा माधुर्येण प्रचुरतया शक्तिसंपत्त्या चाद्भुततमा पुरा जीवितभाषा प्राचीनब्राह्मणानां देशेषु विराजते स्मेति मे भाति। .....यो नैपुण्योत्कर्षः तेषु व्याकरणेषु शोभतेतरां तं मानवबुद्धिः प्राप्तुं शक्नौतीत्येतदाश्चर्यावहम्। तत्कर्तारः विवेचनशक्त्या जगत्स्वाढ्यतमां भाषां कतिपयानां पुटपाकफलसदृशानामवयवानां गणे पर्युपस्थापयितुं शक्नुवन्तीति।"

तदनन्तरं स शब्दकोषान् काव्यानि पुराणानि छन्दःशास्त्रम् अलङ्कारशास्त्रं च परिगणयति। इतिहासविषये मुघलविदुषामैतिहासिकग्रन्थानेवोपदधाति। ततः स वदति-

"ब्राह्मणानामन्तर्गृहमस्माभिः प्रवेशनीयं नाम। ते महाकुलीनतया धर्मशास्त्रवैशारद्येन गणितविज्ञानेन दर्शनपारङ्गतत्वेन च लोके उत्कृष्टतमं स्थानमारोहन्तीति।"

एवं स विविधशास्त्राणि संक्षेपेण निरूपयति। विशेषतो ज्योतिषशास्त्रं जानाति। तथा हि जयपुरं गत्वा सवाईजयसिंहमहाराजस्यास्थानमुपगम्य तस्य ज्योतिषशास्त्रविशारदस्य पण्डितराजभूतस्य प्रबुद्धस्य राज्ञो दर्शनं लब्ध्वा तस्य ज्योतिःपरीक्षाकेन्द्रे नक्षत्रनिरीक्षणानि परिमाणानि विविधविमर्शान् चान्वतिष्ठत्। वेदान्तविषये स शङ्कराचार्यं योगवासिष्ठरामायणं चोद्दिश्य वदति--

"(शङ्कराचार्यमते) आत्मैवास्ति, नान्यत् किंचित्। एकोऽप्यात्मा केनापि प्रकारेण त्रिगुणोऽस्ति-स हि सच्चिदानन्दो नित्योऽमूर्तोऽनन्तोऽस्ति। किंत्वहंतानुभूतेस्तन्मनोहरभावनाननुरूपत्वात् तैराचार्यैरन्यद्विपरीतस्वरूपं तत्त्वं वास्तवसत्तारहितं स्वीकृतम्। एतत् माया नाम विपर्ययमप्यस्ति। उदाहरणतः--अहमिदानीं वेदान्तविषये भवतः कृते पत्रं लेखितुं मन्ये। वस्तुतोऽहं संमोहितोऽस्मि। परन्तु मम विपर्ययस्य सत्ता नास्ति। तद्व्याख्यानार्थं तेषामाचार्याणां मुखे रज्जुसर्पोपमा सततमुपलभ्यते। ...मायाया मुक्त्यर्थं स्वात्मनि सततनिदिध्यासनेन नित्यानन्तकेवलपरमात्मभावानुभवेन तत्परमतत्त्वानुभूतिर्मायावेशादविक्षेपणीया इति तेषां प्राज्ञता। तैः प्राज्ञंमन्यैरसुराणामपि गर्वमतिक्रम्य सततं जप्तेषु अहं ब्रह्मास्मीत्यादिषु महावाक्येषु मुक्त्युपायो वर्तते।"

ख्रीस्तधर्मानुयायी भूत्वा पोंस्-महाशयः परमेश्वरजीवात्मनोः द्वैतपक्षमनुमत्य नाद्वैतमतं स्वीचक्रे। एवमेकवारमेव स्वमतघोषणतात्पर्येण प्रचोदितः शङ्कराद्वैतविषये

आक्षेपशब्दान् प्रयुज्य खण्डनप्रयत्नमकरोत्। अन्यत्र स केवलं यथामति संक्षिप्तरूपेण मतान्तराणि न्यरूपयत्। तेन स्वग्रन्थे भारतीयवस्तुतत्त्वानि सारल्येनान्वाख्यायन्ते स्म। तेन वैज्ञानिकदृष्टिः प्रतिष्ठापितासीत्। क्वचित्क्वचित् विज्ञापनहीनतया कश्चिद्विभ्रमो विद्यते। तस्मिन्काले भारतीयतत्त्वानां विषये समीचीननिवेदनं दुःसाध्यमासीत्। यदा विज्ञानप्रवणतया स्वभावसाम्यतो ब्राह्मणपण्डितानां ख्रीस्तीयविदुषां च संमतिरासीत् तदा तैस्तेषां संगमः सौम्यप्रकारेण सुसाध्यः सन् फलमुत्पादयामास। अन्यदेशीयप्रचारकः संस्कृतभाषाप्रतिपत्तये संस्कृतग्रन्थलिखितकोशलब्धये च ब्राह्मणोपाध्यायमुपागच्छत्। संस्कृतोपाध्यायः शास्त्राणि साहित्यं च यथेष्टमुपदिश्य संस्कृतपुस्तकक्रयविक्रयं स्वीचकार। परन्तु अष्टादशशतकारम्भे प्रायेण ब्राह्मणा अपात्रेभ्यो ब्रह्मविद्याया रक्षणं चिकीर्षवो वेदोपनिषदादिपुण्यग्रन्थानामुपदेशं दातुमनिच्छवः सन्तः अन्यधर्मप्रचारकजनेभ्यः तद्ग्रन्थानां लिखितमातृकाः क्रेतुं दर्शयितुमपि न स्वीकृतवन्तः। अत एव पोंस्-प्रेषितग्रन्थद्विशतीसमुदाये वैदिकग्रन्थानां पुस्तकानि नोपलभ्यन्ते, नाप्युपनिषदाम्, नापि पाणिनीयव्याकरणग्रन्थानाम्। तथा हि अष्टाध्याय्यां छान्दसरूपाणि उपदिश्यन्ते। अपात्राय वैदिकभाषापि न दातव्येति मन्यन्ते स्म श्रोत्रियाः। सारस्वतव्याकरणे मुग्धबोधे जौमारसंक्षिप्तसारे छन्दो नोपादीयत इति कृत्वा ख्रीस्तीयप्रचारकेभ्यः तान् ग्रन्थान् यथेष्टं प्रतिपादयितुं स्वीचक्रुः।

केवलमष्टादशशतकमध्यमभागे वेदग्रन्थानां द्वित्राणि पुस्तकानि दक्षिणभारते कल्मेत् (Calmette)-नाम्ना ख्रीस्तीयप्रचारकेण लब्धुं शक्यते स्म। केवलमष्टादशशतकान्ते अँक्तील्दुपेरों-नामा फ्राँसीयविद्वान् दाराशिकुह्मुघलराजकुमारविरचितं पञ्चाशत उपनिषदां पारसिकानुवादमधिकृत्य लतिन्-भाषानुवादं व्यरचयत् युरोपीयदेशेषु च ब्रह्मविद्यां ज्ञापयामास। केवलमेकोनविंशशतके जर्मनीदेशीयविद्वान् 'बह्त् लिङ्क' (Bohtlingk)-नामा जर्मनीभाषामाश्रित्य पाणिनिकृताया अष्टाध्याय्या अनुवादमकरोत्।

विज्ञानं न कदापि पर्याप्तमस्ति। हैन्रीष् रोथ्, एर्नेस्त् हाँक्स्लेन्, जाँ-फ्राँस्व-पोंस् इति विद्वत्त्रयं त्रिशतकीयस्य संस्कृतविज्ञानप्रगतीतिहासस्यादौ तिष्ठति। ते संस्कृतविषये विज्ञानस्य नवीनस्रोतः प्रतिष्ठापयामासुः। ते आधुनिकसंस्कृतविमर्शप्रतिष्ठापकोपाधिं धारयितुमर्हन्ति। बहुविधविमर्शानां विशालक्षेत्रमधुनापि वरीवृत्यते। अपि च विमर्शो न खलु भारतीयपण्डितानामेव परन्तु विश्वविदुषामधिकारोऽस्ति। तद्विद्वत्त्रयकालात्प्रभृति संस्कृतविषयेऽन्ताराष्ट्रियं नवनवविज्ञानं वर्धते वर्धिष्यते च।

❖



# सौश्रवस-पाणिनि-शास्त्ररीतिद्वयपरीक्षा

यन् हुबन्

किं ज्ञान-तुल्य-पवित्रम् अत्र लभ्यते (एकपदी प्रभावती-त भ र ज ग)

विद्या-कारुण्य-पूर्णेन्दुं गुरुजीति सुविश्रुतम्।
शब्दादि-शास्त्र-विच्-छ्रेष्ठं हृदये प्रणमाम्यहं॥
संस्कृत-भाषणे नैव क्लेशः परन्तु सूनृता।
इति-साधु-वचो-मार्ग-देशिकाय नमो नमः॥[1]

1. आधुनिक-महाग्राम-रूप-वसुन्धरायां पश्चिम-प्राच्य-लोक-परस्पराभिप्राय-संमेलनार्थं परीक्षा कर्तव्या।[2] का परीक्षा? शास्त्ररीतिद्वयस्य परीक्षा। कस्य शास्त्ररीतिद्वयस्य! पश्चिम-लोके सौश्रवस-(Eucleides)-प्रोक्त-गणितशास्त्रं सुप्रसिद्धं च सुविकसितं च। प्राच्य-लोके भारत-मण्डले च पाणिनि-प्रोक्त-व्याकरणं सुप्रसिद्धं च सुविकसितं च। तयोरेव शास्त्ररीतिद्वयस्य परीक्षा कर्तव्या। तथा हि–

यवन-द्वीपे पुराणकाले साधारण-युगात् पूर्वं चतुर्थ-शताब्दे वर्ती[3] ॲय्क्लेइदेस् (Eucleides) नामको महाविद्वान् आसीत्।[4] स च ॲय्क्लेइदेस् पश्चिम-लोक-सुप्रसिद्धां गणितशास्त्रे प्रधानकृतिं स्तोय्खेय-(Stoicheia)-नाम-कृतिं प्रोवाच। ॲय्क्लेइदेस्-नाम्नः अर्थः ॲय्क्लेओस्-(Eu-clesos=Su-sravas)नामक-पुरुषस्यापत्यम् इति। अथवा सुश्रवसः अपत्यम् इति। अथवा सौश्रवस इति। तस्य प्रधानकृतेः स्तोय्खेय-नाम्नः अर्थो बीजभूतज्ञानानीति (Elements)। तत्र च प्रायेण सिद्धान्तातिदेश-(axiom and deduced theorem)-प्रकारेण क्षेत्रविद्या-प्रधानं गणितशास्त्रं प्रतिपादितम्।

भारत-द्वीपे च पुराणकाले साधारण-युगात् पूर्वं चतुर्थ-शताब्दे वर्ती दाक्षीपुत्रः पाणिनिर्नामको महाविद्वान् आसीत्। स च पाणिनिर्भारत-मण्डल-सुप्रसिद्धां व्याकरण-

शास्त्रे प्रधानकृतिम् अष्टाध्यायी-नाम-कृतिं प्रोवाच।[5] तत्र च प्रायेण उत्सर्गापवादप्रकारेण प्रकृतिप्रत्ययरूप-वाक्यस्थ-पदविद्या-प्रधानं शब्दशास्त्रं प्रतिपादितम्।

अथ यद्यद् अस्मिन् विषये मम प्रतिपादनाभिप्रेतं तत्सर्वमत्र संक्षेपतः एकस्यां स्रग्धरायाम्[6] उक्तम्।

**पाणिन्युक्तं प्रमाणं सकल-भरत-वर्षे पुराब्दात् प्रभृत्या**
**बालानां चैवम् आदौ विधि-गण-परिभाषा-समूहोऽवधार्यः।**
**अध्येया पश्च-लोके गणित-गमित-सिद्धान्त-राशिर्यथैव**
**वृत्तावत्यद्भुतायाम् अगवम-विधिरन्यत्र गौणोऽग्रिमो वा॥**

तथा हि।

**2.1. पाणिन्युक्तम्** इत्यादिप्रथमपादः। तत्रेदं प्रतिपादितम्।

**सकल-भरत-वर्षे** संपूर्ण-भारत-मण्डले। आधुनिक-अफ्गणिस्तान्-पाकिस्तान्-इन्दियादि-गोचरे। **पुराब्दात् प्रभृत्या** पुराणकाले च ततः प्रभृति च। चतुर्थ-शताब्दे साधारण-युगात् पूर्वं ततः पश्चात् च। किञ्च इह-निरूप्यमाण-व्यवस्था पाठशालादिष्वद्यपर्यन्तमेव प्रतनोति। **पाणिन्युक्तं** पाणिनिना प्रोक्तं व्याकरणशास्त्रम्। भारतीय-शब्दशास्त्रे हि दाक्षीपुत्रः पाणिनिः व्याकरण-शास्त्रस्य प्रधानकृतेः अष्टाध्याय्याः प्रोक्ता? भारतदेशे च सा कृतिः शब्दशास्त्रे च शब्दशस्त्रात् परमपि च प्रमाणभूता।

**2.2. बालानाम्** इत्यादिद्वितीयपादः। तत्रेदं प्रतिपादितम्–

भारत-मण्डले च बालानां शिष्याणाम् अध्ययन-काल आदौ पूर्वभागे पाणिनिना प्रोक्तं व्याकरणं वा ततो निष्कृष्टं स-व्याख्या-लघुसिद्धान्तकौमुद्यादि-व्याकरणं वा ततः पाणिनि-प्रोक्त-व्याकरणात् प्रपञ्चितं सिद्धहेमचन्द्रादि-व्याकरणं वा विधि-प्रतिषेधसंज्ञापरिभाषाधिकार-सूत्र-धात्वादि-गणादि-समूह-रूपं व्याकरणम् अवधार्यम् प्रयत्नेन सविज्ञानमध्येयम्। किञ्च न केवलं शिष्याध्ययनकाले व्याकरणस्य प्राधान्यं दृश्यते अपि तु शास्त्रप्रणयनकालेऽपि। तद्यथा काश्मीरशिवाद्वैतपरम्परायाम् उत्पलदेवाभिनवगुप्तादिभिः स्वसिद्धान्त-स्थापनार्थं प्रायेण व्याकरण-शास्त्ररीतिरेवानुसृता।

संस्कृत-साहित्ये च व्याकरणस्तुतिश्लोकबाहुल्यं व्याकरणशास्त्रप्राधान्यस्य सूचना। उक्तं हि भर्तृहरिणा व्याकरणशास्त्रविषये–

**पवित्रं सर्वविद्यानाम् अधिविद्यं प्रकाशते।**[7]

अधुनापि भारतदेशे सुविज्ञातमेवेदं सुभाषितम्–



**यद्यपि बहु नाधीषे तथापि पठ पुत्र व्याकरणम्।** इत्यादि।[8]

कात्स्न्र्यस्यार्थं चेदमपि वक्तव्यम्। भारतमण्डले सत्यपि व्याकरणशास्त्रस्य प्राधान्ये तथापि गणितशास्त्रमपि साफल्येन विकसितम् आर्यभट्टादिभिः।

**2.3 अध्येया** इत्यादितृतीयपादः। तत्रेदं प्रतिपादितम्–

भारत-मण्डले व्याकरणम् अध्येयम् बालानाम्, **यथैव पश्च-लोके।**[9]

पश्चिम-लोके यूरप्-अमेरिकादि-आख्यातमण्डले गणितशास्त्रम् अध्येयम्। आधुनिकफ्रान्स्-जर्मणि-इङ्लन्द्-अमेरिकादि-गोचरे। अथवा पुराणकाले च यवन-द्वीपे अथवा ग्रीस्-मध्ये ततः पश्चात् च यूरप्-आदि-आख्यातमण्डले। तत्र पूर्वकाले चाधुनिककाले चेदम् अध्यापकानाम् इच्छा यद् बालकैः बालिकाभिश्चाध्ययनकाले पूर्वभागे **गणित-शास्त्रे गमितानां** सप्रमाण-युक्तिभिः संस्थापितानां **सिद्धान्तानां राशिः** भूरिशः **अध्येया** प्रयत्नेन सविज्ञानमध्येतव्येति। पश्चिम-लोके च ॲय्क्लेइदेस् अथवा सौश्रवसो महाविद्वान् गणितशास्त्रस्य सुप्रसिद्धा प्रधानकृतिरिति प्रोवाच।

कात्स्न्र्यस्यार्थं चेदमपि वक्तव्यम् । सत्यपि गणितशास्त्रस्य प्राधान्ये पश्चिमलोकेऽपि शब्दशास्त्रं न सर्वथावधीरितम्। पुराणकाले च त्रिवियुं-नामके शास्त्रत्रये व्यवसायेनाधीयते स्म। त्रिवियुं-नामके शास्त्रत्रये च व्याकरणस्य महत्त्वपूर्णता। इदमपि वक्तव्यम्। भारतीयव्याकरणशास्त्रे श्रोत्रग्राह्यशब्दविषयस्य प्राधान्यं दृश्यते। गणित-शास्त्रे तु चक्षुर्ग्राह्यरूपविषयस्य प्राधान्यं दृश्यते।

यथा च भारतमण्डले शब्दशास्त्रस्तुतिबाहुल्यं तथा पश्चिममण्डलपरंपरायां गणितशास्त्रस्तुतिबाहुल्यं दृश्यते। तद्यथा। यत् पूर्वकाले षोडशशताब्द्यां महाविद्वान् गलिलेयो गलिलेयि वदति स्म। तद् इदानीमपि वारंवारम् उपन्यस्तम्।[10] तदिदानीं प्रथमवारं संस्कृतानुवादे श्लोकद्वयरूपे प्रोक्तम्।

**पुस्तिकासदृशं विश्वं तत्त्वविद्यात्र लेखिता।**
**किंभाषायां लिपिर्न्यस्ता गणितशास्त्रभाषणे॥**
**तत्त्वविद्यात्र या प्रोक्ता त्र्यस्त्रचक्रादिभाषणे।**
**विना गणितशास्त्रेण सा नैवातिप्रसीदति॥**

(इति गलिलेयो गलिलेयि महाविदुषो भावना।)

**2.4. वृत्ताव्** इत्यादिचतुर्थपादः। तत्रेदं प्रतिपादितम्।

भारतीय-पश्चिम-मण्डलयोर्योऽवगमस्य शास्त्रप्रतिपादितविज्ञानस्य **विधिः** रीतिः

प्रकार एकत्र मण्डले गौणोऽप्रधानो भवति स एवान्यत्र अन्यतरमण्डले अग्रिमः प्रधानो भवति। यश्च शास्त्रप्रतिपादितविज्ञानस्य विधिः रीतिः प्रकारस्तस्मिन् एव मण्डले अग्रिमः प्रधानो भवति स एवान्यमण्डले गौणोऽप्रधानो भवति।

कथमिदमुपपादितम् इत्यस्मिन् विषय ऐकमत्यं नास्त्येव। कश्चेदं ज्ञातुं शक्नोति। तथास्मद्दृष्टिं प्रति अत्यद्भुतायां वृत्ताव् एवायं भारतीय-पश्चिम-मण्डलयोः शास्त्र-रीतिविशेष उपपादितः।

भारत-मण्डले व्याकरणस्य प्राधान्यं यथा पश्चिम-मण्डले गणितशास्त्रस्यैवेतीदमनेकवारं प्रतिपादितं विद्वद्भिः। यथा औगुस्त् विल्हेल्म् वोन् श्लेगल्,[11] सर् आर् जी भाण्डारकर्,[12] दान्येल् एच् एच् इङ्गल्स्,[13] फ्रित्स् स्ताल्,[14] रफएल तोरेल्ल[15] इत्यादिभिः। इदानींपर्यन्तं तु संस्कृतभाषायामिदं न कदाचित् प्रतिपादितम् इति मन्यामहे। नवीनवस्तुनवीनाभिप्रायप्रतिपादनाद् विना च संस्कृत-वाण्याः संपूर्णजीवितत्वं नास्तीव।

3.2 अत्रेदानीमपीदं प्रष्टव्यम्। भारतीय-पश्चिम-मण्डलयोः शास्त्ररीति-विषय आत्मभेदो वा संतोलनभेदो वा वर्तते। तथा ह्याह रुद्यर्द् किप्लिङ्। प्राची हि प्राची पश्चिमा च पश्चिमेति।[16] अत्रास्य श्लोकस्य उपन्यासः।

आत्मभेदस्तयोरस्ति मन्यन्ते किप्लिङादयः।
संतोलनात्मको भेद इङ्गल्स्-स्ताल्भ्यां तु दृश्यते॥

4. परमार्थतस्त्वत्र शास्त्ररीतिद्वय-विषये कारिका-द्वयमिदं सर्वथोपपन्नम् इति मन्यामहे।

**प्रज्ञा विवेकं लभते भिन्नैरागमदर्शनैः।**
**कियद् वा शक्यम् उन्नेतुं स्वतर्कम् अनुधावता॥**
**तत् तद् उत्प्रेक्षमाणानां पुराणैरागमैर्विना।**
**अनुपासितवृद्धानां विद्या नातिप्रसीदति॥[17]**

इति वाक्यपदीयद्वितीयकाण्डवृत्त्यन्तर्वर्तिकारिकाद्वयम्।

❖



## टिप्पण्यः

1. पुण्यपट्टननगरे उपदिशतां शास्त्रिणां श्री वामनशास्त्र भागवत "गुरुजी" (1918-2004) इति स्मरणार्थं श्लोकद्वयम् इदम् अस्माभी रचितम्।

2. दृश्यताम् Marshall McLuhan & Bruce R. Powers, *The Globol Village : Transformations in World Life and Media in the 21st Century, Oxford : 1989* तत्र च *"On the one hand there is ... Visual Space--the linear, quantitative reasoning of the Western world : on the other hand there is Acoustic Space--the holistic, qualitative reasoning of the East ... with the advent of the glodal village ... these two worldviews 'are slamming into each other at the speed of light' : 'the key to peace is to understand both these systems simultaneously."*

3. सुबोधार्थं वाक्ये सन्धिः कदाचित् अनादृतः "सा (संहिता नाम सन्धिः) विवक्षामपेक्षते" इति न्यायेन। तदर्थं च कदाचित् समासेऽपि सन्धिरनादृतः।

4. ॲव्क्लेइदेस् (Eucleides) नामकस्य महाविदुषो जन्मात्ययसंवत्सरद्वयं सम्यक् न ज्ञायते। तस्य जन्म तु साधारण-युगात् पूर्वं चतुर्थ-शताब्देऽभवद् इति बहवो मन्यन्ते। तस्य स्तोय्खेय-नामक-प्रधानकृतेः प्रथमः संस्कृतानुवादः अरब-अनुवाद-द्वारेण सप्तदशमशताब्दे कृतः। दृश्यताम् Wilhelm Halbfass, *India and Europe : An Essay into philosophical Understanding, Delhi : 1990, p.186.*

5. दाक्षीपुत्रस्य पाणिनेः कः काल इत्यस्मिन् विषये ऐकमत्यं न विद्यते। "रूपादाहतप्रशंसयोर्यप्" इतिसूत्रप्रमाणात् तु अष्टाध्यायी साधारणयुगात् पूर्वं चतुर्थशताब्दमध्यात् पश्चात् प्रणीता। साधारणयुगात् पूर्वं चतुर्थशताब्दमध्यात् पश्चात् हि रूप्यनामार्हा मुद्रा लभ्यन्ते। मुद्रानाम च पुराणतरेषु ग्रन्थेषु विद्यते रूप्यनाम च नवीनतरेषु ग्रन्थेषु विद्यते। अधिकम् अन्यतोऽवधारणीयम्। दृश्यताम् पाणिनेरष्टाध्यायी-नामकप्रधानकृतेः प्रथमो यूरोपीयभाषायामनुवादः 'ओत्तो बोह्तलिङ्क' महाविदुषा जर्मनभाषायां कृतः नवमदशमशताब्दे। दृश्यताम् O. von Hinuber, *Der Beginn der Schrift und fruhe Schriftichkeit in Indien*, Stutt-

gart: 1989. p.34; H. Falk. Schrift im Alten Indin, Freiburg : 1993. p.304. पाणिनेरष्टाध्यायी-नामकप्रधानकृतेः प्रथमो यूरोपीयभाषायामनुवादः 'ओत्तो बोहतलिङ्क' महाविदुषा जर्मणभाषायां कृतः नवमदशमशताब्दे।

6. स्रग्धराया अनेकलक्षणं विद्यते। यथा--

पूर्वे स्युर्वेदवक्रास्तदुपरि यगणः शुद्धषट्कं च वक्रो
रद्वन्द्वान्तेऽथ वक्रः पुनरपि चरणानीति चत्वारि यस्याम्।
मार्तण्डाश्चैर्मुनीन्द्रैः पुनरपि मुनिभिर्यत्र विश्रान्तिरुक्ता
छन्दःसन्दोहकल्पद्रुमकुसुमकृतस्रग्धरा स्रग्धरा सा।।

(वृत्तमुक्तावली श्रीकृष्णभट्टकविकलानिधिगुम्फिता, जोधपुर 1963, प.61)

स्रग्धरायां च यतिभङ्गो न दोषभागिति न्यायेन यतिभङ्गोऽप्यनेकवारं दृश्यते। यथास्मिन् लक्षणे द्वितीयपादे। अस्माकं सु स्रग्धरारचने अभिप्रायसंक्षेपप्रतिपादनस्यैव प्रधानलक्ष्यत्वात् प्रथमयतिरेवादृता।

7. संपूर्णा कारिका।

तद् द्वारमपवर्गस्य वाङ्मलानां चिकित्सितम्।
पवित्रं सर्वविद्यानाम् अधिविद्यं प्रकाशते।। इति भर्तृहरिर्वाक्यपदीये।।1.14।।

8. यद्यपि बहु नाधीषे तथापि पठ पुत्र व्याकरणम्।
स्वजनः श्वजनो मा भूत् सकलं शकलं सकृच् छकृत्।। इति।

एवंरूपं सुभाषितं सुविज्ञातम्। तथापि छन्दसो रुचिरत्वार्थं चोद्गीतिसमापनार्थं च चतुर्थपादः केनचित् प्रकारेण प्रपञ्चयितव्यः। यथा। सकलं मैव सकृदपि शकृत्।। इति मन्यामहे।।

व्याकरणस्तुतिविषये इदमपि द्रष्टव्यम् J.A.F. Roodbergen "Praise and Blame of Grammarians, Naiyaikas and Mimamsakas," *Annals of the Bhandarkar Oriental Research Institute,* vol. LXXXVII (2006) : 105-121.

9. प्रायेणादृष्टमपि पश्च इतिशब्दरूपं सुबोधमेव। पश्चिमवाचिनः पश्चाद् इतिशब्दरूपाद्धि सरलमपोद्धरणीयम् इदं शब्दरूपम्। पश्च पश्चा च छन्दसीतिसूत्रे (5.3.33) च पाणिनिना छन्दोविषये निर्दिष्टम्।

10. एवं ह्याह गलिलयो गलिलेयि (Galileo Galileo) महाविद्वान् इतालियाभाषायाम् *Il Saggiatore* नामककृतिमध्ये (1623 : cap. VI) : "La



filosofia è scritta in questo grandissimo libro che continuamente ci sta aperto innanzi a gli occhi (io dico l'universo), ma non si può intendere se prima non s'impara a intender la lingua, e conoscer i caratteri, ne' quali è scritto. Egli è scritto in lingua matematica, e i caratteri son triangoli, cerchi, ed altre figure geometriche, senza i quali mezi è impossibile a intenderne urnanamente parola; senza questi è un aggirarsi vanamente per un oscuro laberinto."

11. एवं ह्याह औगुस्त् विल्हेल्म् वोन् श्लेगल् (August Wilhelm von Schlegel), Réflexions sur l' étude des langues asiatiques नामककृतिमध्ये (Bonn-Paris : 1832, p.31-37; quoted from E Staal, *A Reader on the Sanskrit Grammarians*, Cambridge, Mass. : 1972, p.56) : "Outre la terminologie ordinaire puisée dans la langue méme, et appropriée seulement à un emploi spécial, Pāṇini et ses successeurs ont imaginé un autre systéme de termes techniques. Ce sont des mots fictifs,des signes abrégés, qu'on peut comparer à ceux de l'algèbre, Il faut en avoir la clé, sans quoi les Aphorismes de Pāṇini ressemblent à des énigmes plus obscures que les oracles de Bacis : de méme qu'un écolier qui ne sait que les éléments de l'arithmétique, ne comprendra rien aux formules algébriques."

12. एवं ह्याह सर् आर् जी भाण्डारकर् (Sir R.G. Bhandarkar), *Second book of Sanskrit* नामककृतिमध्ये (Bombay : 1873, Preface to Third edition, p. xi in fifth edition 1881) : "Sanskrit Grammar has thus becomes a science at (Pāṇini's and other grammarians) hands, and its study possesses an educational value of the same kind as that of Euclid.."

13. दृश्यताम् Daniel H.H. Ingals, "The Comparison of Indian and Western Philosophy." *Journal of Oriental Research* XXII (1954) p.1-11

14. दृश्यताम् Frits Staal, "Euclid and Panini." *Philosophy East and West* 15 (1965) : 99-116 = Frits Staal, *Universals, Chicago :* 1988 : p.143-160. तस्मिन् एव विषये Johannes Bronkhorst,

"Panini and Euclid : Reflections on Indian Geometry." *Journal of Indian Philosophy* 29 : 43-80 (2001); Kim Plofker, *Mathematics in India* (Princeton 2009), p.214-216.

15. दृश्यताम् Raffaele Torella, "Examples of the influence of Sanskrit grammar on Indian philosophy." East and West 37 (1987) : p.151-164.

16. एवं ह्याह कवी रुद्यर्द् किप्लिङ् (Rudyard Kipling), "The Ballad of East and West" नामककवितामध्ये (1889) "East is East and West is West, and never the twain shall meet. अस्यां कवितायां सत्यपि कदाचित् पश्चिम-प्राच्य-पुरुष-व्यक्ति-द्वयस्य पौरुषवैर्यसाम्ये तथापि सामान्येन पश्चिमप्राच्यलोकयोरत्यन्तदूरता प्रतिपादिता।

17. कारिकाद्वयमिदं श्री वामनशास्त्री भागवत इति शास्त्रिभ्योऽत्यन्तं प्रियमभवत् तत्र च प्रथमकारिका तैरनेकवारम् उपन्यस्ता।

❖



# स्वामिनो विवेकानन्दस्य स्तोत्रसाहित्यम्

डॉ. नारायणदाशः

## उपक्रमः

1863 संवत्सरस्य जनवरीमासस्य 12 दिनाङ्कः। 1269 बङ्गाब्दस्य पौषसङ्क्रान्तिः। कृष्णसप्तमी तिथिः। अस्मिन् शुभयोगे उत्तरकोलकातायाः दत्तपरिवारे जनिमलभत कश्चन योगजन्मा विलक्षणः शिशुः संसारं सम्मोहयन्निव। पिता विश्वनाथो दत्तः कोलकाता-उच्चन्यायालये अधिवक्ता। माता भुवनेश्वरी देवी। दम्पत्योः कन्यास्तु आसन् बह्व्यः परन्तु पुत्रः कश्चन नास्ति इति वीरेश्वरस्य शिवस्य शरणं गतौ दम्पती अस्मिन् शुभक्षणे पुत्ररत्नं प्राप्य नामकरणं व्यधत्ताम्–विले–इति। प्रचलितं नाम नरेन्द्रनाथ इति। तेन सह भुवनेश्वरीमातुः वङ्गमातुश्च भाग्यरविरेव समुदितः। सत्यमेवमुक्तं कविना-अरुण किरण उछलि उठिल उदिले येदिन वङ्गे।

वि.ए. परीक्षामुत्तीर्य विधि (Law)–अध्ययनसमये पारिवारिकस्थितिः सम्यक् न स्थिता स्वामिनः। अनन्तरकाले श्रीरामकृष्णदेवात् दीक्षितः सन् 1886 अगष्टमासस्य 16 तारिकायां गुरोः महाप्रयाणात् परं पूर्णतया तस्य धर्मप्रसारे मतिं कृतवान्। स्वामी विवेकानन्दनाम्ना परिचितोयं नवारुणसमः तरुणः सन्न्यासी 1893 ईसवीयसंवत्सरे सितम्बर 11 दिनाङ्के आमेरिकायाः शिकागो-धर्ममहासभायां भाषितवान्। ततः विदेशभ्रमणम्। भारतं प्रत्यागत्य 1897 मे 1 दिनाङ्के रामकृष्णमिशनस्य स्थापनां कृतवान् वेलुडे पुण्यतीर्थे। 1902 जुलाई 4 दिनाङ्के महाप्रयाणमभवदस्य दिव्यात्मनः।

स्वामी विवेकानन्दो यद्यपि प्रत्यक्षतया कुत्रापि संस्कृतं नाधीतवान्, तथापि तत्र तस्य अधिकारित्वमासीदेव स्वचेष्टया। अद्वैतवेदान्तस्य गभीरज्ञानम् आङ्गलभाषया लौकिकभाषया च सः अत्युत्तमतया प्रतिपादयति स्म। एकेन शब्देन वदामश्चेन् मानवसेवामेव स माधवसेवां मनुते स्म। यत् तेन 'प्राक्टिकाल् (practical) वेदान्त' इति कथ्यते स्म। गुरोः कृपापरम्परया अपूर्वं साधितवान् सः।

वस्तुतः संस्कृतक्षेत्रे विवेकानन्दस्य योगदानं चतुर्धा विभाजयितुं शक्यते-1. हिन्दुत्वक्षेत्रे 2. अद्वैतवेदान्तक्षेत्रे 3. रामकृष्णमिशनमाध्यमेन 4. स्वरचितस्तोत्रमाध्यमेन। मूलतः शिवभक्तः स जगदीश्वरस्य शिवस्य, जगदम्बायाः शिवायाः, जगदाधारभूतस्य गुरोः रामकृष्णदेवस्य स्तवनं संस्कृतेन कृतवान्। आहत्य सः 7 स्तोत्राणि लिखितवान्। 1. शिवस्तोत्रम्, 2. अम्बास्तोत्रम्, 3. श्रीरामकृष्णप्रणामः 4-6 त्रीणि श्रीरामकृष्णस्तोत्राणि, 7. श्रीरामकृष्णप्रशस्तिश्च। आहत्य (6-7-1-4-4-1-3) 26 श्लोकैः सप्तस्तोत्रैश्च स्वामिवर्यः व्यासदेवस्य श्लोकार्धेन प्रवक्ष्यामि इव कोटिग्रन्थैरुक्तं संस्कृतवाङ्मयं विशदीकृतवान्-इति नास्ति सन्देहस्य लेशोऽप्यवसरः। 1. शिवस्तोत्रम्-6 श्लोकैः निबद्धम्। स्वकीयं भासुरं भावबन्धं द्रढयितुं कविः प्रार्थयति जन्मजन्मान्तरबन्धनं त्रोटयितुम्-

**निखिलभुवनजन्मस्थेमभङ्गप्ररोहः**
**अकलितमहिमानः कल्पिता यत्र तस्मिन्।**
**सुविमलगगनाभे त्वीशसंस्थेऽप्यनीशे**
**मम भवतु भवेऽस्मिन् भासुरो भावबन्धः॥1॥**

विभुत्वव्याजेन यः सकलमपि परस्मै समर्प्य परप्रेम्णा समर्पणभावनाया शिखराधिरूढे दैवभावे महादेवत्वं प्राप्नोतीति स्वामिनो निर्व्याजवचनं स्मरणीयमेव।

**निहतनिखिलमोहेऽधीशता यत्र रूढा**
**प्रकटितपरप्रेम्णा यो महादेवसंज्ञः।**
**अशिथिलपरिरम्भः प्रेमरूपस्य यस्य**
**हृदि प्रणयति विश्वं व्याजमात्रं विभुत्वम्॥2॥**

अग्रे पूर्वसंस्कारसहकारेण जन्मचक्रे कर्मबन्धने च निपतितो जीवो भेदभावसमाकीर्णे हृदये निर्विकल्पसमाधिना चित्तस्थमीश्वरं लब्धुमिच्छति युष्मदस्मत्प्रतीतिं विहाय। यतो हि हृदयस्थः आत्मा वा ईश्वरो वा पूर्वसंस्कारवशात् जीवं कर्मणि प्रचोदयति। यथोक्तं भगवता गीतायाम्-

**ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति।**
**भ्रामयन् सर्वभूतानि यन्त्रारूढानि मायया॥18.61॥**

यथा उत्कलीयकविः पण्डितः गोपबन्धुदाशः शिवरात्रि-कवितायां प्रत्यपादयत्-



दूरदेवालये यिवा नाहिँ प्रयोजन, निज आभ्यन्तरे बावु कर निरीक्षण।
हृद कपिलासे तोर वहे प्रेम झर, विजे करिछन्ति तहिँ स्वयम्भू शङ्कर॥

**वहति विपुलवातः पूर्वसंस्काररूपो**
**विदलति बलवृन्दं घूर्णितेवोर्मिमाला।**
**प्रचलति खलु युग्मं युष्मदस्मत्प्रतीतम्**
**अतिविकलितरूपं नौमि चित्तं शिवस्थम्॥3॥**

अगणनकर्मबन्धनरूपे विविधभाववृत्तिसंस्कृतिभित्रे शरीरे यथा चित्तवृत्तिनिरोध-पूर्वकसाधनावशात् विकारः शान्तो भवति, तदा एव ईश्वरप्राप्तिः सुलभा इति प्रतिपादितं वर्तते।

**जनकजनितभावो वृत्तयः संस्कृताश्च**
**अगणनबहुरूपा यत्र चैको यथार्थः।**
**शमितविकृतिवाते यत्र नान्तर्बहिश्च**
**तमहह हरमीडे चित्तवृत्तेर्निरोधम्॥4॥**

विगते मोहान्धकारे ज्ञानपुञ्जस्य प्रकाशे साधकस्य हृदि शोभमानः राजहंस आत्मा एव आत्मानं रक्षतु। उद्धरेदात्मनात्मानम् इति श्रुतिवचनं प्रकाशयति साधकश्रेष्ठः-

**गलिततिमिरमालः शुभ्रतेजःप्रकाशः**
**धवलकमलशोभः ज्ञानपुञ्जाट्टहासः।**
**यतिजनहृदिगम्यो निष्फलो ध्यायमानः**
**प्रणतमवतु मां स मानसो राजहंसः॥5॥**

सदा परहितकरणाय विषपानेन नीलकण्ठं रूपं दधानं सकलदोषप्रशमनोपायं सदाशिवमेवं प्रणमति--

**दुरितदलनदक्षं दक्षजादत्तदोषं**
**कलितकलिकलङ्कं कम्रकह्लारकान्तम्।**
**परहितकरणाय प्राणप्रच्छेदप्रीतं**
**नतनयननियुक्तं नीलकण्ठं नमामः॥6॥**

## 2. अम्बास्तोत्रम्

सप्तश्लोकीरूपेयं स्तुतिः कदाचित् शङ्कराचार्यस्य स्तोत्राणि स्मारयति स्वीयापूर्व-

भावपरम्परया यत्र प्रथमे श्लोके एव स्वामिपादः विश्वसर्जने अपरप्रयत्नरूपां मातरं परिचेतुं प्रयत्नपरो लक्ष्यते, अन्ते च सफले वा सा एकैव गतिः मुक्तिः भाग्यविधात्री इति मनुते।

का त्वं शुभे शिवकरे सुखदुःखहस्ते
आघूर्णितं भवजलं प्रबलोर्मिभङ्गैः।
शान्तिं विधातुमिह किं बहुधा विभग्नां
मातः प्रयत्नपरमासि सदैव विश्वे॥1॥

या मा चिराय विनयत्यतिदुःखमार्गै-
रासिद्धितः स्वकलितैर्ललितैर्विलासैः।
या मे मतिं सुविदधे सततं धरण्यां
साम्बा शिवा मम गतिः सफलेऽफले वा॥7॥

निरालम्बो लम्बोदरजननि कं यामि शरणमनुकृत्य भावगम्भीरशब्दैः यत् स्वमनोभावं शरणागतिं च निवेदयति स्वामी तदित्थम्-

सन्तानयन्ति जलधिं जनिमृत्युजालं
सम्भावयन्त्यविकृतं विकृतं विभग्नम्।
यस्या विभूतय इहामितशक्तिपालाः
नाश्रित्य तां वद कुतः शरणं व्रजामः॥4॥

कदाचिदियं धात्री, अन्यत्र धृतकर्मपाशा शुभाशुभफलप्रदात्री इच्छानुरूपं संसारं पालयित्री अपरा काचिद् विधात्री वर्तते। शङ्कराचार्यानुसारं यस्याः इच्छाशक्तिं विना शिवोऽपि स्पन्दितुं न शक्नोति, क्वचित् शवायते, किं पुनः सामान्यो भक्तः। सा आदिशक्तिरेव कवेः ध्यानगोचरीभूता वर्तते।

सम्पादयन्त्यविरतं त्वविरामवृत्ता
या वै स्थिता कृतपलं त्वकृतस्य नेत्री।
सा मे भवत्वनुदितं वरदा भवानी
जानाम्यहं ध्रुवमियं धृतकर्मपाशा॥2॥

किं वा कृतं किमकृतं क्व कपाललेखः
किं कर्म वा फलमिहास्ति हि यां विना भोः।



इच्छागुणैर्नियमिता नियमाः स्वतन्त्रै-
र्यस्याः सदा भवतु सा शरणं ममाद्या॥3॥

विवादे विषादे प्रमादे प्रवासे, अहौ वा हारे वा, मित्रे वा रिपौ वा यस्याः देव्याः अमृतदृष्टिः संसारे रक्षति, सा एव शरणं कवेः। स्वीयमसामर्थ्यं प्रकाशयति स्वामीजीः विनम्रतया देव्याः महिमानं वर्णयितुम्।

मित्रे रिपौ त्वविषमं तव पद्मनेत्रं
स्वस्थे सुखे त्ववितथस्तव हस्तपातः।
छाया मृतेस्तव दया त्वमृतं च मात-
र्मुञ्चन्तु मां न परमे शुभदृष्टयस्ते॥5॥

क्वाम्बा शिवा क्व गृणनं मम हीनबुद्धे-
र्दोर्भ्यां विधर्तुमिव यामि जगद्विधात्रीम्।
चिन्त्यं श्रियां सुचरणं त्वभयप्रतिष्ठं
सेवापरैरभिनुतं शरणं प्रपद्ये॥6॥

## 3. गुरुवन्दना

स्वामिनो विवेकानन्दस्य सर्वं किमपि सिद्धं गुरुकृपया। अनन्यभक्तिभावनया भावितोऽयं साधकः सर्वतोभावेन धर्मसंस्थापकरूपेण, किं बहुना अवतारपुरुषरूपेण प्रतिष्ठापयति गुरुवरेण्यम्। यथा वदति प्रणाममन्त्रे-

स्थापकाय च धर्मस्य सर्वधर्मस्वरूपिणे।
अवतारवरिष्ठाय रामकृष्णाय ते नमः॥

प्रथमे श्रीरामकृष्णस्तोत्रे चतुर्भिः श्लोकैः रामस्य कृष्णस्य च उत्तरावताररूपेण नरदेवरूपेण च प्रतिपादयति श्रीरामकृष्णदेवम्।

आचण्डालाप्रतिहतरवो यस्य प्रेमप्रवाहः
लोकातीतोऽप्यहह न जहौ लोककल्याणमार्गम्।
त्रैलोक्येऽप्यप्रतिममहिमा जानकी प्राणबन्धो
भक्त्या ज्ञानं वृतवरवपुः सीतया यो हि रामः॥9॥

स्तब्धीकृत्य प्रलयकलितं बाहवोत्थं महान्तं
हित्वा रात्रिं प्रकृतिसहजामन्धतामिस्रमिश्राम्।

गीतं शान्तं मधुरमपि यः सिंहनादं जगर्ज
सोऽयं जातः प्रथितपुरुषो रामकृष्णस्त्विदानीम्॥2॥

नरदेव देव जय जय नरदेव।
शक्तिसमुद्रसमुत्थतरङ्गं
दर्शितप्रेमविजृम्भितरङ्गम्॥
संशयराक्षसनाशमहास्त्रं
यामि गुरुं शरणं भववैद्यम्।
नरदेव देव जय जय नरदेव॥3॥

नरदेव देव जय जय नरदेव।
अद्वयतत्त्वसमाहितचित्तं प्रोज्ज्वलभक्तिपटावृतवृत्तम्॥
कर्मकलेवरमद्भुतचेष्टं
यामि गुरुं शरणं भववैद्यम्।
नरदेव देव जय जय नरदेव॥4॥

द्वितीये श्रीरामकृष्णस्तोत्रे-तस्मात्त्वमेव शरणं मम दीनबन्धो-इत्यस्य पादपूरणात्मकं श्लोकचतुष्टयं विरचय्य स्वामिवर्यः अगतिकगतिकं गुरुपादपद्मं शरणं व्रजति।

ओम् ह्रीं ऋतं त्वमचलो गुणचिद् गुणेड्यो
नक्तन्दिवं सकरुणं तव पादपद्मम्।
मोहङ्कषं बहुकृतं न भजे यतोऽहं
तस्मात्त्वमेव शरणं मम दीनबन्धो॥1॥

भवभेदकारि भक्ति-भग-भजन-त्रिकं हृदि न भाति चेत् शरणं गुरुपदाब्जमेव-

भक्तिर्भगश्च भजनं भवभेदकारि
गच्छन्त्यलं सुविपुलं गमनाय तत्त्वम्।
वक्त्रोद्धृतं तु हृदि मे न च भाति किञ्चित्
तस्मात्त्वमेव शरणं मम दीनबन्धो॥2॥

मरणोर्मिनाशकं जन्मचक्रविनाशकं मर्त्यामृतप्रापकं तदेव इति स्वामिनः सम्मतम्।



तेजस्तरन्ति तरसा त्वयि तृप्ततृष्णा
रागे कृते ऋतपथे त्वयि रामकृष्णे।
मर्त्यामृतं तव पदं मरणोर्मिनाशं
तस्मात्त्वमेव शरणं मम दीनबन्धो॥3॥

हरेर्नाम हरेर्नाम हरेर्नामैव केवलं मन्यमानः स्वामिपादो मङ्गलमयं गुरोर्नामैव केवलं स्मरति।

कृत्यं करोति कलुषं कुहकान्तकारि
ष्णान्तं शिवं सुविमलं तव नाम नाथ।
यस्मादहं त्वशरणो जगदेकगम्य
तस्मात्त्वमेव शरणं मम दीनबन्धो॥4॥

अग्रिम एकश्लोकात्मके श्रीरामकृष्णस्तोत्रे कविः वेद-यज्ञ-पुराणेषु स्तुतगीतः परमपुरुषः स एव इति सडिण्डिमघोषं प्रतिपादयति। अस्य श्लोकस्य शीर्षकं ग्रन्थे नास्ति। वङ्गीयसंस्करणे 256 पुटे वर्तते श्लोकोऽयम्।

सामाख्याद्यैर्गीतिसुमधुरैर्मेघगम्भीरघोषै-
र्यज्ञध्वान-ध्वनित-गगनैर्ब्राह्मणैर्ज्ञातवेदैः।
वेदान्ताख्यैः सुविहितमखोद्भिन्नमोहान्धकारैः
स्तुतो गीतो य इह सततं तं भजे रामकृष्णम्॥1॥

गुरोर्गरिमानं यथा वदतु नाम शिष्यः न तृप्यति। अतः वारं वारं तस्य स्तवनं कृत्वा अन्ततः प्रशस्तिं रचयति श्लोकत्रयेण श्रीरामकृष्णप्रशस्तौ। देहात्मवादिनः मूढाः आत्मनः क्षीणान्,दीनान् मन्वन्ते, परन्तु रामकृष्णभक्ताः आस्तिकाः तद्विपरीतमात्मानं वीरान् गतभयान् मन्वते। संसारत्यागिनः कौपीनवन्तः स्वार्थसिद्धिं विहाय परमपीयूषं पीत्वा श्रीगुरुचरणं ध्यायन्ति। यथा–

क्षीणाः स्म दीनाः सकरुणा जल्पन्ति मूढा जनाः
नास्तिक्यन्त्विदन्तु अहह देहात्मवादातुराः।
प्राताः स्म वीरा गतभाया अभयं प्रतिष्ठां यदा
आस्तिक्यन्त्विदन्तु चिनुमो रामकृष्णदासा वयम्॥1॥

पीत्वा पीत्वा परमपीयूषं वीतसंसाररागाः
हित्वा हित्वा सकलकलहप्रापिणीं स्वार्थसिद्धिम्।

ध्यात्वा ध्यात्वा श्रीगुरुचरणं सर्वकल्याणरूपं
नत्वा नत्वा सकलभुवनं पातुमामन्त्रयामः॥2॥

**4. उपसंहारः**

वैश्विकफलके हिन्दुत्वस्य हिन्दुधर्मस्य भारतीयदर्शनस्य भारतीयजनजीवनस्य समाजमूल्यस्य किं बहुना, संस्कृतस्यापि मूल्यायनम् ऐदम्प्राथम्येन स्वामिना विवेकानन्देन एव कृतम्। भारतीयजनमानसे स्तोत्रसाहित्यस्य अप्रतिमं प्रभावं परिलक्ष्य श्रीरामकृष्णदेवमवताररूपेण प्रतिष्ठापयितुकामोऽयं सन्न्यासी देवीसप्तशत्याः तं प्रतीकं गृहीतवान्, यत्र देव्याः उत्पत्तिविषये शस्त्रप्राप्तिविषये च वर्णितमस्ति। वेदसमुद्रं मथित्वा हरिहरब्रह्मादिभिः गृहीतं भौमनारायणानां प्राणैरापूरितं तत् पूर्णपात्रं श्रीरामकृष्णस्य तनुं धत्ते इत्यनेन स्तोत्रेण प्रतिपादयति स्वामिवर्यः। एवमेव श्रीरामकृष्णतत्त्वस्य वैश्वीकरणे स्वामिनो विवेकानन्दस्य स्तोत्रसाहित्यमलमिति वक्तुं सुशकम्। सन्न्यासिनः कवेः अन्तिमनतिः आस्माकीनप्रणतिपुष्पायितं सत् विलसतु तस्य गुरोः पादकमलयोः–

**प्राप्तं यद्वै त्वनादिनिधनं वेदोदधिं मथित्वा**
**दत्तं यस्य प्रकरणे हरिहरब्रह्मादिदेवैर्बलम्।**
**पूर्णं यत्तु प्राणसारैर्भौमनारायणानां**
**रामकृष्णस्तनुं धत्ते तत्पूर्णपात्रमिदं भोः॥3॥**

❖

**सन्दर्भग्रन्थाः**


1. स्तवनाञ्जलिः, प्रका. रामकृष्णमठः, नागपुरम्, प्रथमपुनर्मुद्रितसंस्करणम्, 2009
2. विवेकानन्दचरित, सत्येन्द्रनाथ मजुमदार, प्रका. तत्रैव।
3. युगनायक विवेकानन्द, स्वामी गम्भीरानन्द, तत्रैव।
4. स्वामी विवेकानन्द, स्वामी अपूर्वानन्द, तत्रैव।
5. Complete Work of Swami Vivekananda, (Bengli & English Editions)


❖



# विद्योतते कृषिविचारो वेदे

**डॉ. ललितः पटेलः**

वेदोऽखिलो धर्ममूलमिति न्यायात् संपूर्णविद्याः समस्ताः विचाराः प्रतिष्ठिताः वेदे।[1] वैदिकर्षयः कृषका[2] आसन् यतो हि कृषिविचाराः वेविद्यन्ते वेदेषु। कालेऽस्मिन्नासीत् कृषिः मुख्या वृत्तिः गोपालेन सह, अत एव कृषिचिन्तनेन सह दृग्गोचरीभवति गो-गोष्ठ-वृषभ-वर्षा-भूम्यादीनां विचारो विविधेषु सूक्तेषु वेदानाम्। अन्योन्याश्रिते कृषिगोपालने आस्तामद्यवत्। अक्षसूक्ते कितवाय ऋषिः कथयामास- 'कृषिमित् कृषस्व[3]' इति। कृषिकार्यरतजनः समाजे आदरं प्राप-'माता पृथिवी महीयम्[4]' इति उक्तत्वात्। कवीनां बुद्धिमतामुत्तमोद्योगः कृषिः सुखप्राप्त्यर्थमाजीविकार्यञ्च। कृषिद्वारैव भद्रमवाप्नोति मानवः।[5] कृषिसम्पादनाय योग्या भूमिः तथा जलमावश्यकम्। उर्वरा[6] भूमिः अप्नस्वती, अनुर्वरा तु आर्तना भूमिः, पशुतृणाय च खिल[7]भूमिः। कृष्यर्थं नदीद्वारा वा कूपद्वारा सेचनं क्रियते स्म। ऋग्वेदे कृत्रिमजलस्रोतसः कृते अवत'[8] इति शब्दो भूयसा प्रयुक्तः। ऋग्वेदे कूपशब्दस्य[9] प्रयोगो वर्तते। जलप्रदानायैव वरुणदेवः प्रार्थितः ऋषिभिः अथर्ववेदस्य वरुणसूक्तस्य मन्त्रैः। कृषिभूमेः स्वामित्वविषये मतभेदो वर्तते। कृषिक्षेत्र-स्वाधिकारः कस्याश्चित् जात्याः नासीत् अपि तु वैयक्तिकाधिकारविषयः यथा अपालायै पितृकृषिक्षेत्रमुर्वरा शिरः-इमानि त्रीणि विष्टपा तानीन्द्र विरोहय। शिरस्ततस्योर्वरादिदमउपोय रे[10] इति।

कृषिकार्याय विविधोपकरणानां प्रयोगं चक्रुः जनाः। भूमिखननाय काष्ठनिर्मित-लौहाग्रखनित्रस्योपयोगं कृत्वा बीजवपनं कुर्वन्ति स्म कृषकाः। पश्यतु खनित्रस्य कृते 'बुक' शब्दस्य प्रयोगः।

**दशस्यन्ता मनवे पूर्व्यं दिवि यवं बुकेन कर्षधः।**
**यवं बृकेनाश्विना वपन्तेषा दुहन्ता मनुषाय दस्रा॥[11]**

हलस्य कृते साधारणं नाम 'लांगल' अथवा 'सीर' इत्यासीत् लाङ्गलं पवीरवत्सुशीमं सोमसत्सरु।

उदिद्वपतु गामवि प्रस्थावद्रस्थवाहनं पीवरीं च प्रफर्व्यम्। (अर्थवेदः-3/17/3) दात्रेण सस्यकर्तनं कृत्वा खलं प्रति आनीय धान्यं भिन्नं क्रियते स्म।[12] सूर्पेण सस्यस्वच्छीकरणप्रक्रिया सम्पादयामास।[13] धान्याकारः सस्यस्वच्छी-करणकार्यं चकार (धान्यकृत् ऋक्.-10/71/2)। सस्यमापनाय 'उर्वर' इत्यस्य प्रयोगः बभूव।[14] स्थिविभ्यः यवानां (धान्यानां) संग्रहः गेहेषु क्रियते स्म।[15]

यवानां माषाणां तण्डूलानां, गोधूमानां, तिलानामुल्लेखो वर्तते वेदेषु। अतो वक्तुं शक्यते धान्यप्रधानः कृषिः वैदिकयुगे क्रियते स्म। फलवृक्षाणां वपनं भवति स्म अथवा वनेषु स्वतः प्रादुर्भावः सञ्जायते स्म इति निश्चितरूपेण कल्पयितुं न शक्यते।[16] जवानामुत्पादनं ग्रीष्मकाले तथा सस्यस्य (अन्नस्य) उत्पादनं शरदृतौ बभूव।[17] मासतिलादीनां वपनं वर्षाकाले चकार। तैत्तिरीयसंहिताऽनुसारं वर्षे वारद्वयम् उत्पादनं भवति स्म।

मूषकपतङ्गादिभ्यः सस्यसंरक्षणाय विविधाः प्रार्थनाः अथर्ववेदे चक्रुः ऋषयः। छान्दोग्योपनिषदि मटचीद्वारा कुरुप्रदेशः नष्टोऽभूत् इति घटनोल्लेखः प्राप्यते।[18] वैदिकार्याणां जीवननिर्वहणाय कृषेः अधिकं महत्त्वमासीत् अत एव ते क्षेत्रपतिनामकस्य देवस्य स्वतन्त्ररूपेण सत्तां स्वीकृतवन्तः, सस्यसम्पन्नतायै तस्य स्तुतिमपि चक्रुः–

**शुनं नः फाला वि कृषन्तु भूमिं**
**शुनं कीनाशा अभि यन्तु वाहै।**
**शुनं पर्जन्यो मधुना पयोभिः**
**शुनासीरा शुनमस्मासु धत्तम्॥[19]**

वैदिकार्याः कृषिणा सह पशुपालनमपि कुर्वन्ति स्म यतः गो-अश्व-कुक्कुर-मेष-महिष-अज-गर्दभ-हस्ति-इत्यादिशब्दानामुल्लेखो वर्तते ऋग्वेदे।[20] तत्र पशूनां त्रिषु विभागेषु विभाजनं कृतम्-वायव्याः आरण्याः ग्राम्याश्च।[21] गौस्तु गङ्गैव आदिकालात् भारतीयजनानां कृते मातृस्वरूपा अतः नदीनां महत्त्वेन सह धेनूनां महत्त्वमपि अङ्गीकृतवन्तः वैदिकर्षयः अतः ते ऊचुः–

**आ गावो अग्मन्नुत भद्रमक्रन्त्सीदन्तु गोष्ठे रणयन्त्वस्मे।**
**प्रजावतीः पुरुरूपा इह स्युरिन्द्राय पूर्वीरुषसो दुहानाः॥[23]**



कृषिकार्ये पशूनां महती आवश्यकताऽऽसीत्, अत एव वृषभस्यापि स्तुतिमकुर्वन् ऋषयः अथर्ववेद (4/11) पृथिव्याः पोषणकर्ता गौः उच्यते। अथर्ववेदस्य तृतीयकाण्डस्य षण्मन्त्रात्मके गोष्ठसूक्ते गवां कृते प्रार्थनामूचुः ऋषयः।

**सं वो गोष्ठेन सुषदा सं रटया सं सुभूत्या।**
**अहर्जातस्य यन्नाम तेना वः सं सृजामसि॥[24]**

एवं वैदिकानां कृषिः तथा कृषिचिन्तनं लोकोपकाराय आसीत्। तदानीं कृषिविज्ञानमासीत् वा न इति विवादास्पदं किन्तु प्रार्थनासमन्विताः जनोपकारकाः भद्राः अदब्धासः, अपरितासः, उद्भिदः विद्योतन्ते कृषिविचाराः वेदे इत्यत्र नास्ति तत्र शङ्कावकाशः।

❖

## सन्दर्भाः

1. 'वेद' इति शब्दः चतुर्णां वेदानां द्योतकः। उक्तं च-'तस्माद्यज्ञात् सर्वहुत ऋचः सामानि जज्ञिरे। छन्दांसि जज्ञिरे तस्माद्यजुस्तस्मादजायत।।'-ऋग्वेदः 10/90/9

2. माता भूमिः पुत्रोऽहं पृथिव्याः। - अथर्ववेदः

3. अक्षसूक्तम् (10-34-13)

4. ऋग्वेदः 1-164-13

5. सीरा युञ्जन्ति कवयो युगा वि तन्वते पृथक्। धीरा देवेषु सुम्न्यौ।।-अथर्ववेदः-3/17/1

6. अथर्ववेदः-14/2/14

7. अथर्ववेदः-7/115/4

8. ऋग्वेदः- 1-55-8,4-17-16

9. ऋग्वेदः-1/105/17

10. ऋग्वेदः-8/91/5

11. ऋग्वेदः-8/117/21

12. अथर्ववेदः-3/17/1

13. ऋग्वेदः-8/117/21

14. ऋग्वेदः-10/71/2

15. तमुर्दर न प्रागता यवेन। ऋग्वेदः-2/14/11

16. पर्वतेभ्यो वितूर्या निर्गा उपे यवमिव स्थिविभ्यः। ऋग्वेदः-10/68/3

17. ऋग्वेदः-3/45/4

18. तैत्तिरीयसंहिता-7/2/10

19. 'मटचीहतेषु कुरुषु।' - छान्दोग्योपनिषद् -1/10/1

20. ऋग्वेदः-4/57/8

21. ऋग्वेदः-1/64/8

22. ऋग्वेदः-10/60/8

23. अथर्ववेदः-4/21/1

24. अथर्ववेदः-3/14/1

❖



# भारतीयदर्शनाभिमतं धर्मपर्यालोचनम्

डॉ.सुधांशु कुमार षड़ङ्गी

निरतिशयानन्दप्राप्तिः भारतीयदर्शनानां धर्मशास्त्राणाञ्च परमं लक्ष्यमिति सुविदितं विद्वद्भिः। निरतिशयानन्दप्राप्तिरेव मोक्ष इति निगदन्ति विपश्चितः। अयञ्च मोक्षः धर्मद्वारेणैवावाप्यते। तत्र धर्मः कः? इति जिज्ञासायां मनीषिणः बहुधा स्वमतं पोषयन्ति। धर्मस्य स्वरूपे तथा च तत्र वर्त्तमानानां भ्रान्तीनां निराकरणे ऐकमत्यं न लभ्यते। यतः कश्चिदपरस्य मतं भ्रान्तमिति प्रतिपाद्य तन्मतं निराकृत्य तन्निराकरणरूपेण स्वमतं स्थापयति। अत्रैवमपि वक्तुं शक्यते यदयं चिन्तकः मतान्तरे दोषं प्रदर्श्य तन्मतं निराकरोति। वस्तुतस्तु प्राचीनाचार्याः परमतखण्डनपुरस्सरः स्वमतपोषकाः आसन्। एते नैरपेक्ष्येण कस्यापि विषयस्य निर्वचनं कुत्रापि न कृतवन्तः। सङ्क्षिप्तेऽस्मिन् शोधलेखे विषयेऽस्मिन् निरपेक्षनिर्वचने जनोऽयं प्रवर्त्तते।

कोशग्रन्थेषु[1] धर्मशब्दस्यास्य बहुष्वर्थेषु प्रयोगः समुपलभ्यते। यथा - शुभादृष्टं, पुण्यं, श्रेयः, सुकृतं, वृषः, स्वभावः, न्यायः, आचार, उपमा, क्रतुः, अहिंसा, उपनिषद्, दानं, धनुः यमः, सोमपः, सत्सङ्गः, अर्हन्, देवतादिविशेषेष्वर्थेषु प्रयुज्यते। यथाह–

कृत्वा प्रवर्ग्यं धर्माख्यं यथावद् द्विजसत्तमाः।
चक्रुस्ते विधिवद्राजस्तथैवाभिषवं द्विजाः॥[2]

श्रीमद्भागवतेऽपि–

द्रुह्योस्तु तनयोर्बभ्रुः सेतुस्तस्यात्मजस्ततः।
आरब्धस्तस्य गान्धारस्तस्य धर्मस्ततो धृतः॥[3]

यद्यपि आ बहुकालात् बहुष्वर्थेषु पदस्यास्य प्रयोगः दृश्यते तथापि अद्यतनसमाजे अस्य परिसीमा निर्धारिता जाता। इदानीं प्रायशः जनाः धर्मशब्दस्य प्रयोगः केवलं सम्प्रदायत्वेनैव कुर्वन्ति, स तु पाश्चात्यप्रभावः इति प्रतीयते। पाश्चात्त्ये यत् इति पदस्य प्रयोगः धर्मशब्दस्य कृते प्रयुज्यते, तत्केवलं संस्थापरमस्ति। यद्यपि धर्मशब्दं सम्प्रदायेऽपि अन्वेतुं शक्यते तथापि अस्यान्वयः शब्देन भवितुं नार्हति।

अयं धर्मः धृञ्[4] धारणे धातोः 'अर्तिस्तुसु...मन्'[5] इत्यौणादिकसूत्रेण मन् प्रत्यये कृते सति निष्पद्यते। अतः धरतीति धर्मः सिद्ध्यति। वस्तुतस्तु धर्मशब्दस्य द्विधा व्युत्पत्तिः स्वीक्रियते। प्रथमतः धरतीति धर्मः, द्वितीयतः ध्रियते लोकोऽनेन इति धर्मः। अत्र द्वितीया करणार्थकव्याख्या न सङ्गच्छत इति केचन वदन्ति। वस्तुतस्तु धारणात् धर्म इत्याहुः इत्यभियुक्तवचनात् यः प्रजाः धारयति इति सः धर्मपदेन वक्तुं शक्यते। स्व-स्वकर्त्तव्यमपि प्रजाः धारयन्तीत्युकवा तद्धर्मपदेनोच्यते कैश्चित् शुद्धशेमुषीयुग्भिः विद्वद्भिः। 'वसुधैव कुटुम्बकम्' इत्युक्तिदिशा सर्वेषामैक्यमतेन धर्ममाध्यमेनैव भवतीति भारतीयदर्शनानि धर्मग्रन्याश्च तत्र तत्र शास्त्रीयं लौकिकं वा शास्त्राणि प्रयतमानाः दरीदृश्यन्ते।

विषयेऽस्मिन् विभिन्नेषु शास्त्रसम्प्रदायेषु दार्शनिकाः बहुधा विवदन्ते। प्रायशः धर्मस्यास्य निर्वचनं पूर्वमीमांसादर्शनसम्प्रदाये प्रामुख्येनोपलभ्यते। यतो हि भट्टपादाः स्पष्टं वदन्ति यत्–

**धर्माख्यं विषयं वक्तुं मीमांसायाः प्रयोजनम्।**[6]

अस्यैव धर्मशब्दस्य माहात्म्यं महर्षिः जैमिनिरपि दर्शयति मीमांसासूत्रस्य प्रतिज्ञावाक्ये 'अथातो धर्मजिज्ञासा'[7] इत्युक्त्वा शास्त्रदीपिकाकारेणापि धर्मजिज्ञासायाः अस्यैव दर्शनसम्प्रदायस्य मुख्यं प्रयोजनं प्रतिपादितम्। उक्तञ्च–

'यदा हि धर्मजिज्ञासा कर्त्तव्येत्युक्त्वा शास्त्रमारभ्यमाणं दृश्यते तदा नूनमिदं शास्त्रं धर्मज्ञानप्रयोजनमित्यवगम्यते।'[8]

अयं धर्मः कः? इति प्रश्ने लौगाक्षिभास्करेणाऽऽह 'यागादिरेव धर्मः'।[9] अस्य स्वरूपं स्पष्टीकर्त्तुं मीमांसासूत्रकारो वक्ति–

**चोदनालक्षणोऽर्थो धर्मः।**[10]

अत्र चोदना-क्रियायाः प्रवर्तकत्वेऽन्वेति।[11] चोदनाशब्दः चुद्[12] सञ्चोदने धातोः युच् - प्रत्यये कृते निष्पद्यते। अतः चोद्यते प्रेर्यते पुरुषः अनयां इति व्युत्पत्त्या



चोदनाशब्दो विधिपरः। अत्र 'चोदना चोपदेशश्च विधिश्चैकार्थवाचिनः' इति वार्त्तिकोक्तेः अथवा चोदनाशब्दो विध्यर्थवादमन्त्रनामधेयसाधारणो वेदमात्रपरः।[13] अतः आचार्यचोदितः करोम्यहमिति सिद्ध्यति। अस्मात् चोदनायाः विधिरूपत्वं प्रतिपादितं भवति। परन्तु चोदनायाः वेदमात्रपरत्वात्, वेदस्य च सर्वस्य धर्मतात्पर्यवत्त्वेन धर्मप्रतिपादकत्वात् नैकदेशत्वात्। उच्यते चात्र चित्रस्वामिना–

'सा लक्ष्यते ज्ञाप्यते अनेनेति लक्षणं प्रमाणं यस्य च चोदनालक्षणः। अर्थः अनर्थसम्बन्धरहितः। एवञ्च वेदबोधितव्ये सति साक्षात् फलद्वारा वा यदनर्थाननुबन्धि इष्टसाधनञ्च तद्धर्मपदवाच्यमिति निर्गलितार्थः।'[14]

अत्र चोदनया अर्थानर्थयोः व्यपदेशः कर्तुं शक्यते। परन्त्वत्र मीमांसान्यायप्रकाशकारः अर्थसंग्रहकारादयश्च चोदनायाः केवलं वेदप्रतिपाद्येऽर्थे एव प्रयोगं कुर्वन्ति, न त्वनर्थे श्येनयागादौ। अत्र शबरस्वामी द्वयोरर्थयोः स्वीकरणं करोति। तन्मते :-

'उभयमिह चोदनया लक्ष्यते। अर्थोऽनर्थश्चेति। कोऽर्थः? यो निःश्रेयसाय, ज्योतिष्टोमादिः। कोऽनर्थः? यः प्रत्यवायाय। श्येनो वज्रः, इक्षुरित्येवमादिः। तत्रानर्थो धर्म उक्तो माभूत् इति अर्थग्रहणम्। कथं पुनरसावनर्थः? हिंसा हि सा। हिंसा च प्रतिषिद्धेति। कथं पुनरनर्थः कर्त्तव्यतयोपदिश्यते? उच्यते - नैव श्येनादयः कर्त्तव्याः विज्ञायन्ते। यो हि हिंसितुमिच्छेत् तस्यायमभ्युपायः इति हि तेषामुपदेशः। श्येनेनाभिचरन् यजेत इति हि समामनन्ति। न अभिचरितव्यम्।'[15]

अस्मात् प्रतीयते यत् श्येनयागादयः अनर्थत्वं प्रतिपादयन्तः अप्यर्थत्वं द्योतयन्ति। अतः मीमांसानुसारं धर्मः वेदप्रतिपाद्यः प्रयोजनवदर्थ इति तल्लक्षणमिति लक्षयितुं शक्यते। विधिः, मन्त्रं, नामधेयः, निषेधः, अर्थवादश्चैते चोदनायां गण्यन्ते। यतः जनाः एभिरेव क्रियायां प्रवर्तन्ते। अतो यद् वेदप्रतिपाद्यप्रयोजनवदिष्टसाधकं कर्म स एव धर्मशब्देन व्यपदेष्टुं शक्यते।

**बौद्धदार्शनिकाः** दुःखध्वंसद्वारा निर्वाणप्राप्तिः शक्यत इति वदन्ति। एतन्मते जगत्यस्मिन् मनुजाः क्लेशकारणादेव भ्रमिताः प्राप्यन्ते। अतः तन्निमित्तं धर्मस्य चर्चाऽत्र क्रियते। अतः अभिधम्मकोशस्यारम्भे प्राप्यते-'सानुचरा अमला प्रज्ञाऽभिधम्म'[16] इति। उक्तञ्च तत्र–

'यतो विना धर्मप्रविचयेन नास्ति क्लेशोपशमाभ्युपायः, क्लेशाश्च लोकं भ्रामयन्ति संसारमहार्णवेऽस्मिन् अतस्तद्धेतोस्तस्य धर्मप्रविचयेन नास्ति क्लेशोपशमाभ्युपायः, क्लेशाश्च

लोकं भ्रामयन्ति संसारमहार्णवेऽस्मिन् अतस्तद्धेतोस्तस्य धर्मप्रविचयस्यार्थे शास्त्राः किल बुद्धेनाभिधर्म उक्तः, न हि विनाऽभिधर्मोपदेशेन शिष्यः शक्तो धर्मान् प्रविचेतुमिति।'[17]

अत्र प्रज्ञायाः धर्मप्रविचयत्वं सिद्ध्यति। धर्माणां प्रविचयः धर्मप्रविचयः। अतः धर्मः पुष्पवद् व्यवकीर्णः प्राप्यते, सः प्रविचीयते, स्तवके च स्थाप्यतेऽनास्रवोऽयं सास्रवोऽयं वा। धर्मप्रविचयकाले धर्मविशेषस्य चित्तसम्प्रयुक्तरूपेण चित्तचैत्तसिकरूपेण वा यस्तु प्रज्ञेत्यभिधीयते, प्राधान्येन तिष्ठति। संस्कृतासंस्कृताभ्यां द्विविधो विभज्यते धर्मः। तत्र यत्र प्रत्ययाः सम्भूय च भवन्ति सः संस्कृतधर्मः। एतद्रहितश्चासंस्कृतधर्मः कथ्यते।

धर्मशब्दः न्याय-वैशेषिकयोः अर्थद्वये प्रसिद्धः वृत्तिमान् इत्येकोऽर्थः, शुभकर्मप्रभावो जीवात्मनि अतीन्द्रियो विशेषगुण इत्यपरोऽर्थः। आद्यानुसारेण यो यत्र वृत्तिमान् स तस्य धर्म इत्युच्यते। एवं घटत्वादयः घटादेः घटादयश्च कपालादेः धर्मः। यो न कुत्रापि वर्त्तते, किन्तु प्रमाणसाक्षिकः सः धर्मशब्देनाभिधातुं शक्यः। कणादेन यतोऽभ्युदयनिः-श्रेयससिद्धिः स धर्मः इत्येवं धर्मः लक्षितः।[18] अन्नम्भट्टेनाऽपि विहितकर्मजन्यो धर्म इत्येवं धर्मलक्षणं निर्दिष्टम्।[19] विश्वनाथस्तु स्वर्गादिसफलसुखानां स्वर्गसाधनीभूतशरीरा-दीनां च साधनं धर्म इति प्रतिपादयति।[20] अत्र धर्मः आत्मनः अन्यविशेषगुणवत् शरीरावच्छिन्ने आत्मनि आत्ममनःसंयोगाज्जायते। शास्त्रविहितानि सत्कर्माणि तत्र निमित्तानि। अयं पुरुषगुणत्वेन स्वीकृतः।[21] कर्तुं सुखं सुखसाधने मोक्षो नवानामात्मवि-शेषगुणानामत्यन्तोच्छेदस्तेषां यः हेतुः सः धर्मपदेन व्यपदेष्टुं शक्यते।

अयं सामान्यविशेषाभ्यां द्विविधः निर्दिश्यते।[22] यः धर्मः सर्वैः मनुष्यैः शास्त्रविहितकर्मद्वारा उत्पादयितुं शक्यः सः सामान्यधर्मः। अत्र निर्दिष्टेषु धृतिक्षमादिषु सर्वे मनुष्याः अधिकृताः। अतः एभिः निष्पद्यमानो धर्मः सामान्यधर्मत्वेनाभिधीयते। परन्तु यानि कर्माणि शास्त्रेषु तत्तद्वर्णानि विहितानि तैः कर्मभिः उत्पद्यमानो धर्मः विशेषधर्मः। यथा यजनं याजनमध्ययनमध्यापनं दानं प्रतिग्रहश्चेति कर्माणि शास्त्रेषु ब्राह्मणकर्मतया, युद्धशासनप्रजापालनप्रभृतीनि कर्माणि क्षत्रियकर्मतया, क्रयविक्रयकृषि-पशुपालनादिकर्माणि शास्त्रेषु वैश्यकर्मतया, त्रैवर्णिकानां कर्मसु यथाधिकारं सहयोगदान-रूपसेवाकर्मप्रभृतीनि कर्माणि शूद्रकर्मतया प्रतिपादितानि। अतस्तैः वर्णैः तत्तत्कर्मणामाचरणेन उत्पद्यमानो धर्मः तत्तद्वर्णानां विशेषधर्मो भवति।[23] श्रीमद्भगवद्गीतायामपि प्राप्यते-

**'चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः।'**[24]

आश्रमभेदेनापि धर्मो भिद्यते।[25] मानवजीवनस्य सुव्यवस्थायै महर्षिभिः शास्त्रेषु



चत्वारः आश्रमाः वर्णिताः ब्रह्मचर्याश्रमः, गृहस्थाश्रमः, वानप्रस्थाश्रमः, संन्यासाश्रमश्चेति। तत्तदाश्रमाणां भिन्न-भिन्न-कर्माणि अपि शास्त्रेषु निर्दिष्टानि। तैः कर्मभिः उत्पद्यमानो धर्मः आश्रमधर्म इत्युच्यते। शिक्षकस्य, छात्रस्य, मातुः, पितुः, पुत्रस्य च धर्मः आश्रमधर्मत्वेनाऽपि वक्तुं शक्यते।

धर्मः प्रकारान्तरेण प्रवृत्तिलक्षणो निवृत्तिलक्षणश्चेति द्विविधः विभज्यते।[26] प्रवृत्तिलक्षणो धर्मः सः उच्यते यो वेदादिशास्त्रेषु तत्तत्फलार्थं कर्त्तव्यतयोपदिष्टकर्मभ्यो जायते। निवृत्तिलक्षणो धर्मः सः यो मोक्षसाधनतया शास्त्रेषु निर्दिष्टः। यथा निष्कामं कर्म भगवत्समर्पणबुद्ध्या क्रियमाणं कर्म, एभिः कर्मभिः उत्पद्यमानो धर्मः निवृत्तिलक्षणो यदुच्यते, तस्य संसारनिवृत्तिं प्रति प्रयोजकत्वात्।

अध्यवसायात्मिकायाः बुद्धेः सात्त्विकं रूपं धर्म इति साङ्ख्याचार्याः आमनन्ति। तत्रोच्यते अभ्युदयनिःश्रेयसहेतुः धर्मः। अत्र यागादानाद्यनुष्ठानोत्पन्नो धर्मोऽभ्युदयहेतुः, अष्टाङ्गयोगानुष्ठानजनितश्च निःश्रेयसहेतुः।

अत्राऽयं प्रश्नः समुदेति यत् किं धर्मस्य ज्ञाने उत वा प्रयोगे मोक्षप्राप्तिः? किं तत्र धर्मस्य साधनत्वमथवा साध्यत्वम्। धर्मस्याचरणेन मोक्षोपलब्धिः उत वाऽन्यस्य साधनान्तरस्याचरणेन धर्मोदये सति मोक्षस्य प्राप्तिः। यतः काचित् परम्पराऽपि वदति धर्माचरणेन पुण्यं, तेन चापवर्गः। तत्र धर्माचरणेनादृष्टस्य प्राप्तिः, तेनैवादृष्टबलात् कैवल्यप्राप्तिः। अस्माकं मते अयं धर्मः कदापि मोक्षस्य साक्षात्साधकं भवितुं नार्हति। यतः भारतीयानां मते धर्माचरणेनाऽदृष्टः, तस्माच्च निःश्रेयसाधिगम उच्यते।

अत्र पुनः धर्मस्य ज्ञाने मोक्ष इति न सङ्गच्छते। यतः कश्चित् मनुष्यः कार्यमकार्यं वा सम्यग्ज्ञात्वापि अकार्यमाचरति। उक्तञ्च-

**'जानामि धर्मं न च मे प्रवृत्तिः, जानाम्यधर्मं न च मे निवृत्तिः।'** इति महाभारते।

अनेन किं तस्य निःश्रेयसाधिगमो भविष्यति? कदापि न। परन्तु तयोः विहितनिषिद्धकार्ययोः ज्ञानपूर्वकं यथा कार्येणानेन धर्मः, कार्यमिदं वेदविहितं वर्त्तते, तस्यैवाचरणेन मोक्षप्राप्तिः जायते। तर्हि किं प्रथमं धर्मस्य ज्ञानं तदनन्तरञ्च तस्य प्रयोगे मोक्षः इत्यपि न सङ्गच्छते। यतः संसारेऽस्मिन् तथा सन्ति ये खलु न जानन्ति किं कार्यं किमकार्यम् इति। परन्त्वज्ञानकारणात् विहितकर्माचरणं तैः सम्पद्यते। तेनैवाऽदृष्टस्योत्पत्तिः, तस्माच्चापवर्गप्राप्तिः तेषां जायते। अतः अस्माकं मते धर्मस्य ज्ञानं भवेत् न वा, तथापि विहितकर्माचरणेन निरतिशयानन्दप्राप्तिः भविष्यति।

सन्दर्भग्रन्थाः

1. हलायुधकोशः, पृ.370
2. महाभारतम्, 14/88/21
3. श्रीमद्भागवतम्, 9/13/14
4. सिद्धान्तकौमुदी, धातुपाठः, 900
5. उणादिसूत्रम्, 137
6. श्लोकवार्त्तिकम्, 11
7. मीमांसासूत्रम्, 1/1/1
8. शास्त्रदीपिका, 1/1/1
9. अर्थसंग्रहः, पृ.13
10. मीमांसासूत्रम्, 1/1/1
11. 'चोदनेति क्रियायाः प्रवर्त्तकवचनमाहुः।' शाबरभाष्यम्, 1/1/2
12. सिद्धान्तकौमुदी, धातुपाठः, 1593
13. तन्त्रसिद्धान्तरत्नावली, प्रथमपरिच्छेदः।
14. तत्रैवम्।
15. शाबरभाष्यम् , 1/1/2
16. अभिधम्मकोशः, 1/3
17. अभिधम्मकोशः, 1/3
18. वैशेषिकसूत्रम्, 1/1/2
19. तर्कसंग्रहः, पृ.162
20. न्यायसिद्धान्तमुक्तावली, पृ.4
21. 'धर्मः पुरुषगुणः।' प्रशस्तपादभाष्यम्, पृ.619
22. तत्रैवम्।
23. तत्रैवम्, पृ.622
24. श्रीमद्भगवद्गीता, 4/13
25. प्रशस्तपादभाष्यम्।
26. न्यायकन्दली, पृ.628

❖



# कविर्भट्टिस्तस्य काव्यञ्च

अरिजित् गुप्तः

## भट्टिकाव्यस्य कर्तृत्वं भट्टिकवेः कालश्च

कालिदासोत्तरे संस्कृतसाहित्ये काव्यशैल्पिकयुगः प्रारभ्यते स्म। महाकविर्भट्टिरपि तद्युगीय एवाभूत्। असाधारणविपश्चित् कविरसौ व्याकरणशास्त्र-काव्यशास्त्रयोः उद्भटवेत्ता रामकथाविषयमाश्रित्य द्वाविंशतिसर्गसमन्वितं रावणवधं नाम महाकाव्यमेकं निर्माय सुधीसमाजे प्रख्याततां प्राप। परिचितिविषयेऽस्य विद्यमानायामपि महत्यां विप्रतिपत्तौ, समुपलभ्यमानाः तथ्यनिचया अन्योन्यनिर्भरा एव वर्तन्ते। टीकाकृन्मल्लिनाथमते महाकाव्यकारस्यास्य प्रकृतं नामासीद् भर्तृहरिः। भर्तृ (भट्टि)-शब्दस्य प्राकृतरूपात् भट्टाद् भट्टिकाव्यस्य प्रकथनमित्यपरे स्वीकुर्वन्ति। केश्चन तु नामसाम्यात् वाक्यपदीयस्य महाभाष्यदीपिकायाः शतकत्रय्यास्तथा भट्टिकाव्यस्य च रचयिताऽभिन्नो जन एक एवेत्यनुमीयते। पुनः मन्दासोर-शिलालेखस्य प्रणेता वत्सभट्टिरेव रावणवधमहाकाव्यस्य निर्मातृत्वेनाऽवधार्यते। परन्तु मतस्यास्य ग्रहणयोग्यता न प्राप्ता, शतकग्रन्थानां भट्टिकाव्यस्य रचनारीतेः स्वातन्त्र्यदर्शनतया रचयितृभिन्नत्वप्रतिपादनात्। निराकृतञ्च भवति मतमिदं, मन्दासोरशिलालेखे अवैयाकरणप्रयोगप्राचुर्यात्।

प्रकृते भट्टिविषये ऐतिहासिकतथ्याभाव एवास्य मतविरोधस्य उत्समूलम्। तथापि काव्यकारेण अन्तिमसर्गस्य एकस्मिन् श्लोके काव्यरचनायाः स्थानस्थले निर्दिश्येते-

**''काव्यमिदं विहितं मया वलभ्यां श्रीधरसेननरेन्द्रपालितायाम्......।**
**कीर्तिरतो भवतान्नृपस्य तस्य क्षेमकरः क्षितिपो मतः प्रजानाम्॥''**

संक्षिप्ताद् अस्मादुक्तिविशेषात् कवेः कालनिर्धारणं कर्तुमसाम्प्रतम्। वलभीतिवृत्ते चत्वारो राजानः श्रीधरनाम्ना उपलभ्यन्ते। 495 ईसवीयाब्दतः 461 ईस्वीयाब्दपर्यन्तं चत्वारो नृपतयो राजत्वं चक्रुः। द्वितीयश्रीधरसेननिर्मिते शिलालेखे भट्टिनामधेयाय कस्मैचित् पुरुषाय भूमिदानमुल्लिखितमस्ति। प्राप्तदानोऽयं जनो भट्टिकविरित्यवधार्यते चेत्तर्हि कवेः समयकालः 610 ईसवीयाब्द इत्यनुमीयते। द्वितीयश्रीधरसेनः सामन्तमहाराज-

माहेश्वर इति विशेषणयुक् विद्योत्साही शैवमतामलम्बी चासीत्। भट्टिकाव्यानुशीलनतः शैवधर्मस्य प्रभावोऽपि अभिलक्ष्यते। तस्यैव श्रीधरसेनस्य राजत्वकाले देशे शैवधर्मस्य प्रभावो वर्धमान आसीत्तदा भट्टिकाव्यं विरचितमिति विचार्यते। सम्भवतः संस्कृत-व्याकरणालंकारशास्त्रयोः ज्ञानप्राप्त्यर्थं सरलोपायोद्भावनाय प्रार्थयामास महाराजः श्रीधरसेनः। तत्तु ससन्मानमङ्गीकृत्य रुचिमयकथानकगुम्फनपुरःसरं शिक्षादानार्थं काव्यमिदं विरचितवानासीद् भट्टिकविः।

कैश्चिद्विचारितं यत्-चतुर्थश्रीधरसेनस्य पृष्ठपोषकतया भट्टिकाव्यस्य विरचनमभूत्। तस्यैव राज्ञः शासनसमये वलभीराजकुलं सामन्तप्रभावात् विमुच्यते स्म। तस्य नृपतेः विविधोपाधिभ्यस्तस्य विस्तृतसाम्राज्याधिपत्यम् अनुमितमस्ति। भट्टिप्रोक्तं "नरेन्द्र" इति विशेषणमपि राज्ञः शक्त्याधिक्यमेव द्योतयति। पुनः भट्टिकाव्यस्य श्लोकैः सह कैश्चन भामहकृतकाव्यालङ्कारस्य समञ्जसता परिलक्षिता भवति। आसीद्भामहः सप्तमशतकप्रथमार्धे स्थितिमान्। निगदितमस्ति तस्य काव्यालङ्कारे-

"काव्यान्यपि यदीमानि व्याख्यागम्यानि शास्त्रवत्।
उत्सवः सुधियामेव अहो! दुर्मेधसो हताः॥"

भट्टिकाव्ये चोक्तम्-

"व्याख्यागम्यमिदं काव्यमुत्सवः सुधियामलम्।
हता दुर्मेधसश्चास्मिन् विद्वत्प्रियतया मया॥"

अष्टाध्याय्याः काशिकावृत्तिकृज्जयादित्यः 661 ईसवीयाब्दे दिवङ्गतः। भट्टिकाव्येन तस्य परिचितिस्तस्य ग्रन्थपठनादेवावगम्यते। अतो दुर्लभे सति मतैक्ये आन्तःसाक्ष्यम् अनुसरद्भिः अस्माभिर्मन्यते ईसवीयषष्ठशतकान्तिमार्धे सप्तमशतकपूर्वार्धे वाऽविर्बभूव महाकविर्भट्टिः।।

## काव्यस्य संक्षिप्तविवरणम्

आलंकारिकप्रदत्तानि महाकाव्यलक्षणानि सर्वथाऽनुसृत्य भट्टिकविः रावणवधाभिधेयं काव्यं विरचयामास। रामजन्मन आरभ्य रामेण रावणवधे कृते तस्य अयोध्याप्रत्यागमनं यावत् सर्वे रामायणीयविषया काव्येऽस्मिन् विधृताः। पाणिनिव्याकरणस्य सूत्राणि काव्यद्वारेण व्याख्यातुं काव्यमिदं कृतवानसौ कविः। टीकाकृता मल्लिनाथेन काव्यमेतदुदाहरणशब्देन विशिष्याऽभिधीयते। विषयस्य अनभिनवत्वेऽपि व्याकरणस्य प्राधान्येऽपि नैतस्य काव्यत्वक्षतिः। स्वप्रतिभास्पर्शेन भाषाचातुर्येण कल्पनाया सुदूरप्रसारितया चरित्रचित्रणनैपुण्येन चेदं रावणवधं महाकाव्यपदमधिरोहति।



जनश्रुतित्वेन प्रचलितमस्ति यदेकदा भट्टिना अन्तेवासिनाम् व्याकरणाध्यापनकाले मध्यवर्तिस्थानेन कश्चित् करी चलितः। अकस्मादेवास्माद् दुर्लक्षणपूर्णात् अशुभोपद्रवाद् वेदस्य अध्ययनमध्यापनं चैकवर्षपर्यन्तं निषिद्धमभूत्। वेदाङ्गत्वात् व्याकरणस्यापि अनध्यायः प्रचलितः। तदा अनध्ययनकालेऽपि काव्यालोचनपुरःसरं व्याकरणशिक्षादानार्थं महाकविः काव्यमिदं निर्ममे। व्याकरणाश्रयत्वात् काव्यस्यास्य बहूनां श्लोकानां दुर्बोधत्वेऽपि क्वचित् कृष्णवलाहकेषु झटिति सौदामनीस्फुरणमिव काव्यशोभा स्वयमेव चकास्तितमाम्, कवेश्चास्य यशोराशिं वितनोति साहित्यमण्डले। भट्टिकवेरीदृशी व्याकरणाश्रिता काव्यशैली एवास्याः करिधावनरूपाया जनश्रुतेः कारणत्वेनाभिगण्यते। न केवलं प्रधानतया व्याकरणस्य अपि तु तत्सहकृतेन गुणालंकारच्छन्दोरीतिव्यञ्जनावृत्तीत्यादीनां गुरुभारशिक्षाप्रदानार्थं काव्यरचनायां हस्तमक्षिपत् कविर्भट्टिः। काव्यमिदं शास्त्रकाव्यमित्यपि नाम्ना परिचीयते, अलङ्कारशास्त्रोक्तानां बहूनामलङ्काराणामत्र सोदाहरणमालोच्यमानत्वात्।

विद्यार्थिभ्यो व्याकरणशिक्षादानस्य उद्देश्यतया विनिर्मितेऽस्मिन् महाकाव्ये द्वाविंशतिः सर्गाः प्राप्यन्ते। ते च सर्गा विभज्यन्ते काण्डचतुष्टये। तत्र प्रथमादिपञ्चमान्ताः सर्गाः प्रकीर्णकाण्ड इत्यभिधीयन्ते। रामजन्मन आरभ्य सीताहरणपर्यन्तां कथामाश्रित्य पाणिनिव्याकरणस्य विविधसूत्राणाम् उदाहरणानि प्रदर्शितानि सन्ति। षष्ठादिनवमान्ताः सर्गा अधिकारकाण्डत्वेनभिधीयन्ते, यत्र बालिवध-सुग्रीवाभिषेकाऽशोकवाटिकादाह-हनुमन्निग्रहादिवर्णने अधिकारसूत्राणि काव्यमार्गेण व्याख्यातानि। सर्गा दशमादित्रयोदशान्ताः प्रसन्नकाण्डशब्देन निगद्यन्ते, शब्दार्थालङ्काराः यत्र साङ्गोपाङ्गमुपवर्णिताः।। शिष्टाः सर्गाः चतुर्दशतो विंशतिपर्यन्ताः तिङन्तकाण्डा इत्यभिधानमाप्नुवन्ति। अस्मिन् स्थले रावणवधादिघटनासन्दर्भे लडादिलकाराणां व्याख्यानां विहितम्।

## व्याकरणमूलत्वम्

महाकाव्यस्य प्रायशः सर्वाण्येव लक्षणनि कृतावस्यां परिलक्ष्यन्ते। अतः काव्यस्यास्य महाकाव्याभिधाने न कश्चिदपि कुण्ठितो भवेत्, परन्तु व्याकरणे दत्तदृष्टिर्भट्टिः व्याकरणस्यैव सूत्राणि व्याख्यातुं कृतप्रयत्नः सन् कविप्रतिभां प्रदर्शयितुम-शक्तोऽभूत् इति मन्यमानाः केचित्काव्यकोविदाः व्याकरणसूत्रमुदाहर्तुकामेन कविना विरचितस्यास्य काव्यस्य निर्माणोद्देश्येऽकृतदृक्पाताः क्वचित् क्वचिदत्र श्रुतिपीडावहां नीरसां पदावलीमालोकयन्तो नासिकामाकुञ्चयन्ति। तेभ्यः काव्यविद्भ्य एदतेव वक्तव्यं यद्यदि पुनरयमनल्पवाग्विभवः कवयिता साहित्यसौन्दर्यदिदृक्षूणां मनांसि तोषयितुमेषिस्यत्तर्हि तद्ग्रन्थः कालिदासादिविरचितेभ्यो काव्यग्रन्थेभ्यो निम्नासनं नाध्यकरिष्यत्।

स्वयमेव स्वकाव्यविषयेऽकथयद्भट्टिकविः यदुक्तिवैचित्र्येण अनन्यसाधारणं गुणालंकारसमेतं व्याकरणशिक्षापुष्टं काव्यमिदं विद्वद्भ्य आनन्दं प्रददाति। व्याकरणलोचनान् विज्ञान् निकषा काव्यमेतत् दीपवत् ज्ञानप्रकाशप्रदायि, अवैयाकरणानां कृते तु चक्षुर्हीनस्य निकटे दर्पणवन्निष्फलम्-

''दीपतुल्यः प्रबन्धोऽयं शब्दलक्षणचक्षुषाम्।
हस्तामर्ष इवान्धानां नास्ति व्याकरणादृते॥''

शब्दशास्त्रे व्युत्पन्नो जनः काव्यमिदं पठित्वा अभिनवां रसमाधुरीमास्वादययति। एतस्यानुभवे व्याकरणज्ञानार्जनम् आवश्यकतां भजते। भट्टिकाव्यानुशीलनतो व्याकरणसूत्राणां यथेच्छव्यवहारो दृक्पथमायाति। तद्यथा-

''कर्मणि दृशिविदः साकल्ये'' इति सूत्रेण णमुल्-प्रत्ययस्य प्रयोगदर्शनार्थं श्लोकनिर्माणम्-

तं विप्रदर्शं कृतघातयत्ना यातं वने रात्रिचरीं डुढौके।
जिघासुवेदं धृतभासुरास्त्रस्तां तारकाख्यां निजघान रामः॥ (2/23)

''विशिपतिपदिस्किन्दां व्याप्यमानासेव्यमानयोः'' इत्यस्य व्यवहारबोधनाय प्रथमसर्गस्थोऽयं श्लोकः-

''लतानुपातं कुसुमान्यगृह्णात् स नद्यवस्कन्दमुपास्पृशच्च।
कुतूहलाच्चारुशिलोपशन् काकुस्थ ईषत्स्मयमान आस्त॥'' (2/12)

कर्मणि लिटः प्रयोग एकस्मिन् श्लोके-

''वलिर्बबन्धे जलधिर्ममन्थे जह्रेऽमृतं दैत्यकुलं विजिग्ये।
कल्पान्तःदुस्था वसुधा तथोहे येनैष भारोऽतिगुरुर्न तस्य॥'' (2/39)

लुङ्लकारस्य प्रयोगं दर्शयति दर्शयति कश्चन श्लोकः-

''अदृक्षताम्भांसि नवोत्पलानि रुतानि चाश्रोषत षट्पदानाम्।
आघ्रायि वान् गन्धवहः सुगन्धस्तेनारविन्दव्यतिषङ्गवांश्च॥''(2/10)

काव्यक्षेत्रे पाणिनीयसूत्राणां सम्यग्वयवहारः कविना प्रदर्शितः। अतः काव्यस्यास्य व्याकरणमूलत्वावधारणाय श्लोकान्तर्गतानि कानिचन वाक्यानि अस्माभिराकलितानि तद्यथा-

1. जिघांसुः (1/7)- ''सनाशंसभिक्ष उः'' इति उ-प्रत्ययः (पा. 3/2/168)
2. कुमुद्वती (1/4)-''कुमुदनडवेतसेभ्यो ड्मतुप्''इति सूत्रम्,(पा.4/2/87)



3. आत्मम्भरिः (1/33)- ''फलेग्रहिरात्मम्भरिश्च'' (पा.3/2/26) इति ग्रहेर्भृञ्चेन्-प्रत्ययः, निपातनात्सिद्धः।
4. हिरण्मयी (1/47)- ''दाण्डिनायन-हास्तिनायनाथर्वणिकजैह्माशिनेय-वाशिनायनि......हिरण्मयानि'' (पा. 6/4/174) इत्यादिना यलोपनिपातनम्।
5. नदीष्णान् (न/43)-नद्यां स्नातीति विग्रहे 'सुपि स्थः' (पा.3/2/4) इत्यनेन कर्तरि क-प्रत्ययः, ''निनदीभ्यां स्नातेः कौशले'' (पा.8/3/89) इत्यनेन च षत्वम्।
6. यायजूकाः-'यजजपशां यङः'' (पा.93/2/166) इति यङः सत्वम्।
7. शौवस्तिकत्वम् (1/33)-''श्वसस्तुट् च'' (पा.4/3/15) इति तुडागमः।

पुनः ''दत्तावधानं मधुलेहिगीतौ.....''इत्यस्मिन् श्लोके मृगविदिति पदस्य निर्माणप्रक्रिया विशेषप्रणिधानमर्हति - व्यध्-धातोः किति क्विपि सति परतः, व्यध्-धातोः यकारो ''ग्रहिज्यावयिव्यधिवष्टिविचतिवृश्चतिपृच्छतिभृज्जतीनां ङिति च'' (6/1/16) इत्यनेन सूत्रेण सम्प्रसार्यते। तथा च ''नहिवृतिवृषिव्यधिरुचिसहितनिषु क्वौ'' (6/3/116) इति सूत्रेण मृगशब्दस्य 'अ' इत्यस्य बृद्धिः।

## काव्यप्रतिभा भाषावैदग्ध्यञ्च

वैयाकरणकविसकाशे भाषास्वाच्छन्द्यं भावमाधुर्यं चाशातीतं वर्तते। परन्तु भट्टिकाव्ये भाषासायुज्यं प्रकाशसारस्यं भावचापल्यञ्च भृशमवलोक्यमानाः सन्ति। अतो वैदर्भीरीतेः कविरित्यपि अभिधातुमर्हति भट्टिः। निरर्थकसमासबद्धपदप्रयोगेऽपि काव्यस्य क्लिष्टत्वं नापन्नम्, पूर्वकालिकमहाकाव्यकर्तॄणां वर्णनाबाहुल्यरूपदोषस्य भट्टिना पूर्णतया वर्ज्यमानत्वात्। गुरुभारमिदं शास्त्रकाव्यं साधारणपाठकसकाशे बोधगम्यतां नाचामतीति काव्यपठनादेवावगम्यते। त्रयोदशसर्गे सेतुबन्धवर्णने निगदिताः श्लोकाः संस्कृतप्राकृतयोः उभयोर्व्याख्यानं विदधति।

यद्यपि काव्येस्मिन् स्थाने स्थाने सावलीलत्वं विहाय कृत्रिमतामाश्रयमाणा भाषा पाठकविरागं जनयति तथापि कविर्भट्टिः क्वचित् क्वचित् कविप्रतिभां प्रकाशयितुं समर्थोऽप्यासीत्। न केवलं व्याकरणशास्त्रवर्त्मनि भाषास्वपि कवेरस्य अबाधविचरणमासीत्। त्रयोदशसर्गे भाषासमावेशने तद्वैदग्ध्यं प्रमाणीभवति। शब्दार्थालङ्काराणां विचित्रबन्धपूर्णरचनारीतेश्च व्यवहारस्तेन अध्यवसित आसीत्, तन्निदर्शनं प्रतिसर्गम् अनल्पतया विराजते। द्वितीयसर्गे शरद्वर्णनं दृष्टान्तत्वेन द्रष्टव्यमस्ति। सौन्दर्यमयी शरत्प्रकृतिः आत्मगुणैर्मुग्धीकरोति सकलजीवान्। भ्रमरविरुतेषु बद्धचित्तं निस्पन्दतया वर्तमानं कुरङ्गं हन्तुकामो

व्याधः कलहंससरवमाकर्ण्य वध्ये लक्ष्ये मनःसंयोगमदत्वायैवोपतिष्ठते-

**''दत्तावधानं मधुलेहिगीतौ प्रशान्तचेष्टं हरिणं जिघांसुः।**
**आकर्णयन्नुत्सुकहंसनादान् लक्ष्ये समाधिं न दधे मृगवित्॥''** (2/7)

अशेषशोभाशालिन्यः शरदो रूपवर्णनान्ते एकावली-अलंकारः कविना प्रयुक्तः-

**''न तज्जलं यन्न सुचारुपङ्कजं न पङ्कजं तद् यदलीनषट्पदम्।**
**न षट्पदोऽसौ यन्न गुञ्जितं न गुञ्जितं तन्न जहार यन्मनः॥''** (2/19)

एतादृशं संक्षिप्तार्थं सार्थकवर्णनं नूनमेवाऽन्यत्र दुर्लभमस्ति। विविधालंकाराणां चमत्कारधृक्षु उदाहरणेषु अनुपमकवित्वशक्तिर्विद्योततेतमाम्। द्वितीयसर्गे रामसीतापरिणये उपमाव्यतिरेकमहिम्ना वर्णितं जानकीसौन्दर्यं पाठकचेतांसि आवर्जयति-

**''हिरण्मयी साललतेव जङ्गमा स्थास्नुरिवाचिरप्रभा।**
**शशाङ्ककान्तेरधिदेवताकृतिः सुता ददे तस्य सुताय मैथिली॥''**(2/47)

भाषायां अबाधाधिपत्यवशात् वस्तुचरित्रविषयानुसारिणो यथोपोयोगिनी भाषा अनायासं व्यवहृताऽभूत्। यथा राक्षसवर्णने-

**''आपिङ्गरुक्षोद्ध्वशिरस्य बालैः शिरालजङ्घैर्गिरिकूटदध्नैः।**
**ततः क्षपाटैः पृथुपिङ्गलाक्षैः खं प्रावृषेण्यैरिव चानशब्दैः॥''**(2/30)

व्याकरणस्य सूत्रविशेषमुदाहर्तुं विशेषशब्दचयने क्रियमाणेऽपि वर्णनमिदं रसोत्तीर्णतां प्रमाणयति। यथा-एकादशसर्गे लङ्कायाः प्रभातवर्णनम्-

**दुरुत्तरे पङ्क इवान्धकारे मग्नं जगत्सन्तनरश्मिरज्जुः।**
**प्रनष्टमूर्तिप्रविभागमुद्यन् प्रत्युज्जहारेव ततो विवस्वान्॥** (11/20)

गभीरे पङ्करूपिणि तमसि मज्जितस्य जगतोऽवयवसंस्थानम् विलुप्तमासीत्, इदानीं आविर्भूते सति मरीचिमालिनि तस्य विस्तारिभिः किरणजालैः जगत् जाग्रतं ज्योतिर्मयं चाभूत्।

यमकालङ्कारस्य रमणीयमुदाहरणम् दशमसर्गे-

**बभौ मरुत्वान् वि-कृतः समुद्रो**
**बभौ मरुत्वान् विकृतः समुद्रो।**

शशिवियोगनिमीलितां कुमुदिनीमभिदृश्य तीरवृक्षस्तां सान्त्वयति पक्षिकूजनैः-

**निशातुषारैर्नयनाम्बुकल्पैः पत्रान्तपर्यागलदच्छविन्दुः।**
**उपारुरोदेव नदत्पतङ्गः कुमुद्वतीं तीरतरुर्दिनादौ॥** (2/4)

अत्र समासोक्तिद्वारेण तीरवृक्षे कुमुद्वत्याञ्च चेतनव्यवहारः समारोप्यते, उत्प्रेक्षया च विहगरवेषु रोदनसम्भावना।



## प्रकृतिविवर्णनम्

भट्टिकाव्यं समालोचयतां बहूनां काव्यमिदं महाकाव्यत्वेन मर्यादापदवीं नाधिरोहति, भाषाविन्यासस्य अकाठिन्येऽपि शब्दचयनस्य अतिसचेतनप्रयासेन भावक्लिष्टताया आपद्यमानत्वात्। किन्तु व्याकरणशिक्षादाने कृतदृक्पातस्य कवेरस्य काव्ये बहुक्षेत्रे व्याहन्यमानेऽपि काव्यरसास्वादे रसरहितत्वं चास्य स्वीकर्तुं नोचितम्, कवेस्तस्य भावप्रवाहणे दत्तावधानत्वात्। निखिलं व्याकरणशास्त्रं काण्डचतुष्टये विभक्तन्तेन। विभिन्ने सर्गे आश्रमर्तुवनचन्द्रतपनोदयादिवर्णनेन अभिनवत्वं चोपपत्रमस्ति। कवेः काव्यप्रतिभा विकसिताऽभूत् द्वितीयसर्गे शरद्वर्णने दशमसर्गे चालङ्कारव्याख्याने। शरद्वर्णने प्रकृतेः सौन्दर्यपात्रम् उच्छलितम्। सरसीषु रक्तकमलानि विकसन्ति विराजन्ते। समुद्रतरङ्गमहिम्ना चञ्चला मधुषट्पदास्तदुपरि इतो भ्रमन्तो विचरन्ति। कविभावनया तद्धूमाकीर्णा चञ्चलाऽनलशिखा-

**तरङ्गसङ्गाच्चपलैः पलाशैर्ज्वालाश्रियं सातिशयं दधन्ति।**
**सधूपदीप्ताग्निरुचीनि रेजुस्ताम्रोत्पलान्याकुलषट्पदानि॥** (2/2)

किमाश्चर्यं वर्णनवैदग्ध्यम्। वैयाकरणसत्ताऽत्र नूनमेवातिक्राम्यते कविसत्तया। शरदागमने जलस्थलयोः सर्वत्र सौन्दर्यप्रतियोगिता प्रचलिता, तत्तु कवेर्दृष्टिपथतो न पलायिता-

**विम्बागतैस्तीरवनैर्निजां समृद्धिं विलोक्यापहृतां पयोभिः।**
**कुलानि सामर्षतयेव तेनुः सरोजलक्ष्मीं स्थलपद्महासैः॥** (2/3)

क्वचिद्वनेषु जातानि कुसुमानि जलेषु विम्बितानि, एतेन सरसा निजशोभामपहृतां मन्यमाना तीरभूमिः क्रोधेनैव स्थलपद्मद्वारेण जलपद्मकान्तिं तिरस्करोति। उत्प्रेक्षामुखेन जलस्थलयोः रूपद्वन्द्वं प्रकटयति कविः। पाण्डित्येन साकं प्रतिभायाः संमिश्रणञ्चात्र दृश्यते। वैदुष्यगुरुभारवैभवेऽपि रमणीयार्थविन्यासः पाठकचमत्कृतिमापादयति।

प्रचलितविषयं परित्यज्य अप्रसिद्धविधिप्रयोगक्षेत्रे वाक्यविन्यासोऽनेकधा जटिलः, शब्दमाधुर्यञ्च, प्राप्तहानिः, अर्थस्यापि दुर्बोधता आपद्यन्ते। परन्तु व्याकरणशास्त्रमादाय प्रबन्धकाव्यस्य एतादृक् साफल्यमयं संरचनं भट्टिनैव सम्भवति स्म। परन्तु समालोचकैः कवेरस्योपरि कृत्रिमता-अनाडम्बरता-जटिलता-नीरसताद्यनेका दोषा आरोपिताः सन्ति। किञ्चित् क्षुण्णे सत्यपि महाकाव्यलक्षणे व्याकारणाऽलङ्काररससमृद्धमिदं शास्त्रकाव्यस्य मर्यादामाप्नोति। व्याकरणस्य जटिलविशुष्कपाण्डित्यमध्ये कवेर्भाषाशैल्पि-

कसम्भासे विदग्धपाठकानां चित्तं तृप्यतीति निश्चप्रचम्। कुत्रचित् लुङ्लिटोः प्रयोगाधिक्यात् रसहीनता जायते चेदपि, कुत्रचिद्वा भाषाया रम्यप्रयोगेण रसास्वादो वितन्यते। क्वचित् व्याकरणात्मकक्लिष्टत्वाद् आक्रान्तं भवेच्चेन्मनः, तदाऽन्यत्र अलङ्कारझङ्कारेण आह्लाद्यते रसिकचित्तम्। वस्तुतो भट्टिः स्वयमेव विरोधाभासस्य उदाहरणरूपम्। स न हि वैयाकरणो न च साहित्यिकः, नरसिंहावतारकल्पो युगपत् खरकोमलरूपवानस्ति।

**भावनामण्डितता**

मनोवैज्ञानिकं विश्लेषणमपि विधत्ते कविरयम्। गोपरमणीनां सारल्यपूर्णा विश्वसनीया सलज्जा दृष्टिः तासामप्रगल्भतां प्रकाशयति। राघवस्ता आलोक्य प्रसन्नतामवाप्नोति-

**स्त्रीभूषणं चेष्टितमप्रगल्भं चारुण्यवक्राण्यपि वीक्षितानि।**
**ऋजुश्च विश्वासकृतः स्वभावान् गोपाङ्गनां मुमुदे विलोक्य॥** (2/15)

रामचन्द्रो जानकीविरहसंज्वरितः, रक्षःकुलोऽपि मित्रसमुदायमरणजन्यशोकसन्तप्तः, द्वयोरेव तुल्यावस्थहेतोः सीतां विमुच्य राघवेण मैत्री करणीया। उत्तप्तलौहखण्डमिव तयोर्मेलनं सुगमं भवेदिति विभीषणस्य मतम्--

**रामोऽपि दाराहरणेन हतैर्बन्धुभिरात्मतुल्यैः।**
**तप्तेन यथायसो नः सन्धिः परेणास्तु विमुञ्च सीताम्॥** (12/40)

राजनैतिकोपदेशमपि विभीषणवचसा वितरति महाकविः-

**एकेन सन्धिः कलहोऽपरेण कार्योऽभितो वा प्रसमीक्ष्य बृद्धिम्।**
**एवं प्रयुञ्जीत जिगीषुरेता नीतिर्विजानन्नहितात्मसारम्॥**

**निष्कर्षः**

एवमखिलानि काण्डानि चास्य काव्यस्य वैयाकरणकविना तथा रचितानि यथा उदाहरणद्वारेणैव पाठकानां शब्दानुशासनवेदनम् अलङ्कारशास्त्रज्ञानञ्च सम्पूर्णं भवेत्, युगपत्तेषामध्ययनेन रसास्वादोऽपि जायेत। अत एव विना व्याख्यानेन भट्टिकाव्यस्य वोधगम्यत्वाभावः, काव्यस्यास्य शास्त्रमूलत्वात्।

व्याकरणशिक्षाप्रचारे मुख्योद्देश्यभूते सति तस्य काव्यरचनायां कृत्रिमता आपद्यत इति यदुक्तं तत्सत्यमेव, किन्तु रसभावाद्यात्मकाऽलौकिकवर्त्मना अस्मभ्यं परनिर्वृतिमपि प्रददाति काव्यमिदम्।

❖



आरण्यकम् (XIX/1) मार्च 2012 ISSN 0975 - 0061
अर्धवार्षिकं संस्कृतशोधपत्रम् आर.एन.आई. सं.58951/94

**संस्कृतप्रसारपरिषद्, आरा**

**प्रकाशनम्**

1. मेघदूतम् (सभूमिका-हिन्दीपद्यानुवादसहितम्) - स्व. पण्डित कमलाकान्त उपाध्यायः
15 रूप्यकाणि
2. भोजपुरी नीतिसतक (भर्तृहरि 'नीतिशतक'स्य भोजपुरी-पद्यानुवादः) -श्री देवकुमार मिश्रः 'अलमस्त'
15 रूप्यकाणि
3. पण्डित दीनदयाल उपाध्याय के 'एकात्ममानवदर्शन' की मीमांसा - श्री नर्मदेश्वर ओझा
15 रूप्यकाणि
4. माण्डूक्योपनिषद्-'नलिन-भाष्य' - पं. जगदीश्वर प्रसाद मिश्र 'नलिन'
35 रूप्यकाणि
5. भरतचरितम् (महाकाव्यम्) - स्व. भवानीदत्त शर्मा
51 रूप्यकाणि
6. राष्ट्रियता : सांस्कृतिक अवधारणा - श्री नर्मदेश्वर ओझा
51 रूप्यकाणि
7. संस्कृतनिबन्धसञ्चयनम् - पं. व्रजभूषण मिश्र 'आक्रान्तः'
41 रूप्यकाणि
8. ईशावास्योपनिषद् एवं केनोपनिषद्-'नलिन-भाष्य' - श्री जगदीश्वर प्रसाद मिश्र 'नलिन'
51 रूप्यकाणि
9. आध्यात्मिकनिबन्धसंग्रह - श्री जगदीश्वर प्रसाद मिश्र 'नलिन'
51 रूप्यकाणि
10. उपेन्द्रविज्ञानदर्शनम् (वेदान्तग्रन्थः) - स्व. पं. उपेन्द्रनारायणदत्त शर्मा
41 रूप्यकाणि
11. भावनाविलासशतकम् - स्व. पं. उपेन्द्रनारायणदत्त शर्मा
21 रूप्यकाणि
12. हनुमच्चरितम् - स्व. पं. वज्रभूषणमिश्र 'आक्रान्तः'
51 रूप्यकाणि
13. उपनिषदों की भूमिका - पं. जगदीश्वर प्रसाद मिश्र 'नलिन'
51 रूप्यकाणि
14. महाभारतसारसंग्रहः (प्रकाश्यः) - स्व. पण्डित वचन मिश्रः
15. चरितरत्नत्रयी - स्व. पं. व्रजभूषणमिश्र 'आक्रान्तः'
51 रूप्यकाणि
16. जगन्नाथचरितम् - डॉ. बनमाली बिश्वालः
60 रूप्यकाणि
17. कृत्-प्रत्ययविश्लेषण - डॉ. गोपबन्धु मिश्रः
204 रूप्यकाणि